येन शूद्रत्वावच्छेदेनास्मदभिमतस्योपदेश्यत्वस्य तद्विषयक-प्रतिज्ञाया वा हानिः स्यात्। किं च शूद्रत्वावच्छेदेनापि नास्माभिरुपदेश्यत्वमुच्यते, न वा चैवर्णिकत्वावच्छेदेन, किन्तु चतुर्ष्वपि वर्णेषु ये यत्समर्थित्वसामर्थ्यवन्तः, ते उपदेश्या इति। परन्तु भवदभिमतस्योपदेश्यत्वविषयक-प्रतिज्ञाया इत्यनन्वितमिव प्रतिभाति। यत्तु शूद्रत्वाप्रयोज्येत्यादि तदप्यसत् यथावस्थितानुष्ठानपर्य्यवसाय्यस्मदाचार्य्य-कर्तृकोपदेश-प्रतियोगिनि शूद्रमात्रे विष्णुप्रीतिविशेषविषयत्वरूपवैष्णवत्वं स्वीकृतमेव न तत्स्वीकारः शूद्राचार्य्यसंग्रहार्थः। तथा सति ब्राह्मणादिषु तत्स्वीकारः किमर्थः स्यात् न्यूनाधिकभावोपेक्षा समोऽहमिति गायता भगवतैव कृता। एवं ग्राह्यान्नत्वाग्राह्यान्नत्वादिवैषम्य-प्रयोजकमदसच्छूद्रलक्षणस्य मन्वादिप्रोदितस्य कथं वैयर्थ्यम् इति।

प्रश्न० उपदेशे रामकृष्णादिमन्त्राः समाना उत तेषु न्यूनाधिकेति।

दुर्ग० इति चतुर्थः प्रधानप्रश्नः, तत्रेदमुत्तरम्। न ह्ययं विकल्पः सम्भवति परस्परं विरुद्धकोटीनामेव विकल्पसम्भवात्। न हि कश्चिद्घटो द्रव्यं पृथिवी वेति विकल्पयति, किन्तु रक्तः कृष्णो वेति साम्यं च केनचिदाकारेणासमयोरपि सम्भवति, कम्बुग्रीवाद्याकारेण पटविसदृशस्यापि घटस्य पृथिवीत्वेन तत्साम्यम्। देवत्वादिना मनुष्यादधिकस्य पशुत्वादिना न्यूनस्य च देवपश्वोः प्राणित्वेन मनुष्यसाम्यम्। एवं चिन्त्यं भगवत्स्वरूपप्रतिपादकत्वेन रामकृष्णमन्त्राणां साम्यं तत्तत्नाम-

घटित-मन्त्रात्मकवाक्यजन्य-शाब्दबोधेभ्यो विषयितया व्याष्ट-
नानां व्यापकता-गुणविशेषादीनां प्रतिपादनेन न्यूनाधिकभाव-
श्चेति ।

टी॰ न्यूनस्य चेति मनुष्यादित्यादावनुषङ्गः । विशेष्य भग-
वत्स्वरूपेत्यादिरामकृष्णादिमन्त्राणां देवतैक्यादिति भावः । व्या-
पकतेत्यादि इदं च विष्णुगायत्रीघटित-नामप्रधानमन्त्राभि-
प्रायेण ।

सम्म॰ इति रामानुजीयाः, अथोपदेशे रामकृष्णादि-
मन्त्राः समाना उत तेषु न्यूनाधिकतेत्यस्मत्प्रश्नस्य यद्यपि तेषा-
मधिष्ठातृ-देवतावतारभेदेन भिन्नकालिकत्वात् तत्प्रादुर्भूतानां
स्वरूपतोऽनुष्ठानस्थानादिभ्योऽपि स्पष्टमेव वैलक्षण्यम्, तथापि
फलतो वैलक्षण्यमस्ति न वेति प्रकटितमेवाभिप्रायमनादृत्यान्य-
हुतमन्यद्वान्तमितिवत् यत् परस्पर-विरुद्धकोटीनामेवैतादृश-
विकल्पसम्भवो नैतेषां सामान्यविशेषभावापन्नाविरुद्धानामिति ।
घटः पृथिवी वेति विकल्पासम्भवदृष्टान्तदानेन देवपश्वोः प्राणि-
त्वेन साम्योद्भावनेन किञ्चित् साधितम् । तत्राथ ईश्वरोऽपि
न शास्ति, के वयमिति प्रतिभाति । किं च देवपश्वोः प्राणि-
त्वेन साम्यमित्यसङ्गतम् । "आपोमयाः प्राणाः" इति श्रुत्याऽद्भि-
र्विना श्वस्यमानप्राणानामेव प्राणित्वस्य बालैरपि सुज्ञेयतया
देवपश्वोः प्राणित्वेन साम्यस्य वक्तुमशक्यत्वादित्यलम् । यच्च
पुनर्मन्त्रात्मकपदवाक्यप्रतिपाद्ये तच्छाब्दबोधे साम्यवैषम्योद्भा-
वनं तदेकाक्षरकूटादिषु कथं सम्भवतीति विचारमनादृत्यैव

कृतं तदपि केनाभिप्रायेणेति स एव स्वयमेव वा ज्ञास्यतीति तन्मफलनम् इति।

व्या० यत्तु फलतो वैलक्षण्यमस्ति न वेति प्रश्नाशय-प्रकटनं तदसङ्गतम्। सामान्यत उपदेशे रामकृष्णादिमन्त्राः समाना उत तेषु न्यूनाधिकतेति प्रश्नवाक्य-शरीरं सामान्यतो न्यूनाधिकभावविषयकं फलतो न्यूनाधिकभावस्तत्राभिप्रेत इति कथं ज्ञायते स्वरूपानुष्ठानस्थानादिभ्यो वैलक्षण्यस्य सर्वैर्ज्ञाततया प्रश्नस्य ज्ञातेतरविषयकत्वावश्यकतया तादृशाभिप्रायवेदनं सुलभमिति चेत्तर्हि,—

"ऐहि-लौकिकमैश्वर्य्यं स्वर्गाद्यं पारलौकिकम्।
कैवल्यं भगवन्तं च मन्त्रोऽयं साधयिष्यति॥"

इत्यादिवचनैरविशिष्टफलतया श्रुतानां तेषां फलांशेऽपि निश्चयात् तादृशाभिप्रायज्ञानमपि दुर्लभमेव। अतः शब्दरूपमन्त्राणां प्रतिपाद्य-वैलक्षण्यावैलक्षण्यविषयकत्वाभिप्रायं प्रश्नस्य ज्ञात्वा तदुत्तरं दत्तम्। किं च फलवैलक्षण्यावैलक्षण्याभिप्रायकत्वं प्रश्नस्य निश्चित्य तदनुरूप उत्तरे दत्ते प्रतिपाद्य-वैलक्षण्यावैलक्षण्याभिप्रायकोऽयं प्रश्न इति भवतां विवादो भवेदेव भवतां यथाकथञ्चिदर्थवर्णनेन स्वाश्रयसन्तोषस्य कर्तव्यत्वात् अन्यद्भुक्तमन्यद्वान्तमिति न्यायो भवतोऽनुसरति। प्रथमं भवद्भिरन्यद्भुक्तमन्यत्प्रकटितमिति सामान्यविशेषभावापन्नाविरुद्धानामिति यदुक्तम् तदसत् अविरुद्धकोटीनां सामान्यविशेषभावाभावेऽपि विकल्पादर्शनात्। न हि घटो भूतं मूर्तञ्चेति विकल्पो भवति

तत्राथ ईश्वरो ज्ञास्यतीति सम्यगुपपादितम्। सर्वज्ञस्य तथापि ज्ञाने प्रायः पदं वदद्भिः। यत्तु देवपश्वोः प्राणित्वेन साम्यमव्यवहितमिति प्रतिज्ञाय तदुपपादकतया "आपोमयाः प्राणाः" इत्यादिकमुक्तम्। तत् श्रुत्यक्षर-तदर्थपर्य्यालोचनाभावजृम्भितम्। श्रुतिर्हि "आपोमयः प्राणः" इति। तत्र हि अन्नमशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो भागस्तत् पुरीषम्। यो मध्यमस्तन्मांसं योऽणिष्ठः तन्मनः। "आपः पीतास्त्रेधा विधीयन्ते" इति प्रारभ्य 'योऽणिष्ठः स प्राणः' इत्युक्त्वा एवं तेजस्यपि त्रेधा परिणाममुक्त्वा योऽणिष्ठः सा वागित्युक्तम्। तदुपरि आहङ्कारिकमनःप्रभृतीनामन्नमयत्वाद्यसम्भवं विचार्य्य श्रुतिः "स्वयमेवाह-अन्नमयं हि सौम्य मनः आपोमयः प्राणस्तेजोमयी वागिति मनःप्रभृतीनामाप्यायकत्वमन्नादेः।" न ह्येतावताऽद्भिर्विना आप्यायमानप्राणानामेव प्राणित्वमिति सिध्यति अन्यथा "प्राणी तु चेतनो जन्मी जन्तुः" इत्यादिकोशविरोधः। तत्र हि जन्मवतां प्राणित्वमुक्तं, देवा अपि जन्मिन एव,—

"आब्रह्मस्तम्बपर्य्यन्ता जगदन्तर्व्यवस्थिताः।
प्राणिनः कर्मजनित-संसारवशवर्तिनः॥"

इति स्मृतिरपि ब्रह्मादिदेवानां प्राणित्वमाह। मास्तु प्राणित्वं तथापि शरीरित्वेन साम्यमवर्जनीयम्। यच्चेत्यादिकमप्यसत् एकाक्षरकूटादिष्वपि साधारणप्रणवमोघटितेषु अर्थविशेषबोधकत्वमिति विचार्य्यैवोक्तम्। अभिप्रायविशेषमपीश्वरः स्वयं ये चान्ये निरूपकाः पदवाक्यप्रमाणज्ञास्ते सर्वे जानन्त्येवेति।

प्रश्न० समानाचेन्मन्त्रान्तरनिषेधः कथं क्रियते ? इति ।

इयं० इति प्रथमप्रश्नावलम्बि-वाक्यम् । अत्रोत्तरम्, मन्त्राणां समानत्वं विशेष्य भगवत्स्वरूपप्रतिपादकत्वेनोक्तमेव, न हि सर्वाधिकारिणां तत्तन्मन्त्रनिषेधोऽस्माभिः क्रियते, किन्तु इष्टविधया मन्त्रार्थज्ञान-तदर्थाऽनुष्ठानद्वाराऽभिमतप्रयोजनविशेषे विनियोजयतामधिकारिविशेषाणां मोक्षप्रयोजनकार्थविशेषानुष्ठानाऽपेक्षित-यावदर्थप्रतिपादकतया निषेधः क्रियते। तादृश-यावदर्थ-प्रतिपादकतया मन्त्रविशेषस्यैतादृशाधिकारिविशेषैरुपजीव्यत्वादिति ।

टी० मन्त्राणां समानत्वे चेदिति शब्दसूचितां सम्भावनां निरस्यति मन्त्राणामित्यादिना विशेष्य भगवत्स्वरूपप्रतिपादकत्वं समानो धर्मः निषेधः कथं क्रियते ? इत्यस्योत्तरमाह,— न ह्येत्यादिना । सर्वाधिकारिणामिति त्रिवर्गापवर्गकामानां सर्वेषामधिकारिणामित्यर्थः । तत्तन्मन्त्रनिषेधः रामकृष्णादिमन्त्रनिषेधः तथा चानन्योपायोपेयानामधिकारि-विशेषाणां तन्निषेधः क्रियत इति भावः । तदेवोपपादयति, किन्तु इष्टविधयेत्यादिना इष्टं द्वारमाह,—मन्त्रार्थज्ञानेत्यादिना । अधिकारिविशेषाणाम् अनुपदमुक्ताधिकारिणां तेषामधिकारिणां तन्निषेधे वीजमाह,—मोक्षप्रयोजनकेत्यादिना । अर्थविशेषोऽधिकारिविशेषेण प्रपदनादिः मन्त्रविशेषे निषेधकारणाभावमाह,—तादृश-यावदर्थेत्यादिना ।

यच्च० इति रामानुजीयाः, अथ सामानाचेन्मन्त्रान्तर-

निषेधः कथं क्रियत इत्यवान्तरप्रश्नस्यापि फलवैषम्याभावो भव-
दभीष्टश्चेदुपदेशवैषम्यं किं प्रयुक्तमित्यर्थकस्य फलवैषम्याभावेन
तत्फलकामानां तत्फलनिष्पत्त्यनिष्पत्तिभ्यामेव विधिरपि निषे-
धोऽपीत्युत्तरमुक्तम्, तदपि राममन्त्रे किं फलजनकत्वं कृष्ण-
मन्त्रे च किम् उभयोर्मन्त्रयोर्वा मोक्षफलाजनकत्वमन्यतरस्य
वोभयोर्वा तज्जनकत्वमिति सप्रमाणलेखाभावेन न्यूनतावत्त्वा-
न्न श्रद्धातव्यमिति तत्खण्डनम् इति।

व्या० अथेत्यादिना प्रकृतप्रश्नस्य स्वाभिप्रायमुक्त्वा फलवैषम्या-
भावेनेत्यादिनास्मद्ग्रन्थस्यास्मदनभिप्रेतार्थमारोप्य तदपीत्यादिना
तद्दूषणमुक्तं तदपि भवतां छलरूपनिग्रहस्थानम्। अधिकारि-
विशेषाणामित्यनेन यदि फलविशेषकामा विवक्षितास्तदायमर्थः
स्यात्। तथा नात्र विवक्षा किन्तु स्वरूपानुरूपोपायोपेयनिष्ठा
विवक्षिताः। तथा च रामकृष्णादिमन्त्राणां यथाप्रमाणं सर्व-
फलसाधनत्वेऽपि मुमुक्षुविशेषाणां तन्निषेधो युक्त एव सत्त्वाभि-
सन्धिविशेषेण सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्युक्तरीत्या सर्व-
फलसाधनेषु रामकृष्णादिमन्त्रेषु अत्र किम्फलजनकत्वं कस्य
मोक्षाजनकत्वमुभयोर्मोक्षाजनकत्वमुत तज्जनकत्वमित्यादि वि-
वादस्यैवावकाशाभावेनास्माकमपि प्रमाणपरतन्त्राणामनभिमते
तादृशार्थविशेषे प्रमाणलेखासम्भव एव। न ह्यनभिमते बाधि-
तेऽर्थे प्रमाणलेखाभावो न्यूनतावहः भवतां श्रद्धाभावेऽपि प्रामा-
णिकाः श्रद्दधुरेव।

प्रश्न० तद्दानं शिष्याय कथं न क्रियते?

कुर्वे॰ इति द्वितीयं वाक्यम्। तत्रोत्तरम्। उक्तहेतोरस्मत्पूर्वाचार्यपरम्परया तेषामनुपदिष्टत्वात् कुलपरम्पराप्राप्तमन्त्रस्यैव गणवर्णर्षिभावादि-विचारमन्तरेणोपदेशत्वस्य कुलक्रमस्यैव प्रतिपाद्यत्वात्। न ह्येते मन्त्रा अस्मत्कुलपरम्पराप्राप्तमन्त्रत्रयव्यतिरिक्ताः लक्ष्मीनाथमारभ्यास्मदाचार्यपर्यन्तं केनचिदाचार्येण कस्यचित् शिष्यस्योपदिष्टा इति।

टी॰ उक्तहेतोरिति अनन्योपायोपेयाधिकारिविशेषावश्यज्ञातव्ययावदर्थप्रतिपादकत्वाद्धेतोरित्यर्थः। कारणान्तरमप्याह अस्मत्पूर्वाचार्यपरम्परयेत्यादिना तेषामनुपदेशे बीजमाह, कुलपरम्परेत्यादिना। ननु रामकृष्णादिमन्त्राश्च भवदाचार्यैः कैश्चिदुपदिष्टाश्चेत् तन्निषेधानुपदेशावयुक्तावित्यत आह, न ह्येते इत्यादि।

सम्प्र॰ इति रामानुजीयाः तद्दानं शिष्याय कथं न क्रियते इत्यवान्तरप्रश्नस्य कौलिकत्वाभावेनोत्तरमुक्तम्। तत्रोच्यते किं कौलिकमन्त्रो ह्येकोऽनेको वा भवतां? एकश्चेद्दर्शविभागेन मन्त्रविभागो भवदुक्त एव विरुध्येत अनेकश्चेत्तत्र फलानेकत्वं तदैक्यं वा अनेकफलकानेकमन्त्राणां कौलिकत्वेऽभिमतधर्मिकप्रयोजनविशेषजनकतायां विनियोगभेदेन सिद्धादिशोधनस्यावश्यकत्वात् रामकृष्णादिमन्त्रैः किमपराद्धम्, एकफलकानेकमन्त्राणां कौलिकत्वस्वीकारस्य वैयर्थ्यसम्भवेन दैवतैक्येऽपि मन्त्रभेदेन कुलभेदस्यापि मन्त्रशास्त्रे दर्शनात्। मन्त्रत्रयव्यतिरिक्तस्यापि तत्फलजनकत्वदर्शनाच्च यत्किञ्चित्कौलिकत्वं किमिति नेतीति विभावनीयम् इति तत्खण्डनमिति।

व्या० नमोऽस्तु इत्यादिकं न खलु अस्मात्कुलपरम्पराप्राप्ता मन्त्रा मूलमूलिभावमापन्नास्त्रयः तत्र मूलमन्त्र एक एव । न चैकस्यैवैकविभागेन वैदिकतान्त्रिकमन्त्रभेदाभिधानं भवतां न युज्यत इति वाच्यम्, अनभिधानज्ञाः खलु भवन्तः । 'ओमित्येकाक्षरम् ओमित्यग्रे व्याहरेत्' इत्यादिश्रुत्युक्तमन्त्रस्य प्रणवस्य वैदिकत्वं "न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयः" इत्यादिमोक्तस्य तस्यैव मन्त्रस्य

"तत्रोत्तरायणस्यादिर्विन्दुमान् विष्णुरन्ततः ।
बीजमष्टाक्षरस्य स्यात् तेनाष्टाक्षरता भवेत् ॥"

इति स्मृत्युक्तस्य प्रणवशून्यस्य तान्त्रिकत्वम् । एवमेकस्यैव मन्त्रस्य वैदिकत्वं तान्त्रिकत्वञ्च । अत एव

"प्रणवेन विहीनास्तु तान्त्रिकाः समुदाहृताः ।"

इति पौराणिका वदन्ति । प्रणवाभावेऽपि प्रणवस्थानाभिषिक्तेनाष्टसंख्यापूरकेण बीजेन प्रणवार्थप्रतिपादकेन घटितस्य तान्त्रिकमन्त्रस्य यावदपेक्षितार्थ-प्रतिपादकत्वमक्षुण्णमेव । अतो नाभिधानविरोधः, तेषामनेकत्वेऽपि विवरणाविवरणिभावापन्नानां नाप्यस्तु फलभेदः । अदृष्टद्वारा फलोपायत्वस्वीकारे हि फलभेदावकाशः

"उक्तार्थविशदीकारयुक्तार्थान्तरबोधकम् ।
मतं विवरणं तत्र महितानां मनीषिणाम् ॥"

इत्यभियुक्तोक्त-लक्षणवद्विवरणविवरणि-भावापन्नानामनेकत्वेऽपि न फलभेदशङ्का । अत एवानेकफलकानेकमन्त्राणामित्यादिविचा-

दिशोधनस्यावश्यकत्वादित्यन्तमप्रकृतम् । रामकृष्णादिमन्त्रैः किमपराद्धमिति चेत् तेषामधिकारिविशेषापेक्षित-यावदर्था-प्रतिपादकत्वमेव तदनुपजीव्यत्वप्रयोजकोऽपराधः एकफलका-नेकमन्त्राणामित्यज्ञानात् । न हि ज्योतिष्टोमदर्शपूर्णमासा-दीनां परस्परनिरपेक्षमदृष्टद्वारा स्वर्गसाधनानामिव मोक्षफल-साधनत्वं तेषामस्माभिः स्वीकृतं, किन्तु तदर्थज्ञान-तदधीनो-पायाऽनुष्ठानरूपदृष्टद्वारेति कथं वैयर्थ्यप्रसक्तिः अदृष्टद्वारा फल-साधनतया स्वीकार एव हि कुलभेदादिविचारः अदृष्टद्वारा मोक्षसाधनानां रामकृष्णादिमन्त्राणां यत्किञ्चित् कौलिकत्वं नास्तीति को ब्रूते? वयं तु अस्मत्पूर्वाचार्य्य-परम्परा-प्राप्तत्वं नास्तीति ब्रूम इति ।

प्रश्न० न्यूनाश्चेत् सर्वमन्त्राणां शास्त्रसम्मतमोक्षदातृत्वावि-शेषेण कुतो न्यूनता ?

दुर्जं० इति तृतीयं वाक्यम् । तत्रेदमुत्तरम् । अनन्योपाय-त्वरूपस्यासाधारण-कारभञ्जकादृष्टद्वारकमोक्षोपायसंसर्गासहा-नामस्मत्सम्प्रदाय्यधिकारिणां दृष्टविधया मोक्षसाधनीभूतानु-ष्ठानविशेषापेक्षित-यावदाकाराप्रतिपादकत्वेन मन्त्रविशेषावधि-कापकर्षवतामपि शास्त्रसम्मतादृष्टद्वारकमोक्षसाधनतावतां न्यून-ताया हेतोरसङ्कद्‌र्शिरिति ।

टी० अनन्योपायत्वेत्यादि,—

"माधवांघ्रिद्वयोपायो माधवांघ्रिप्रयोजनः ।
स उत्तमाधिकारी स्यात् कृतकृत्योऽत्र जन्मनि ॥"

इत्याद्युक्तानामनन्योपायोपेयानामधिकारिविशेषाणामदृष्टद्वारकमोक्षोपायान्तर-स्वीकारेऽनन्योपायत्वरूपाकारविशेषस्य भङ्गः स्यादेवातस्तेषां तत्संसर्गो न सह्य इति भावः। अनुष्ठातृविशेषापेक्षितेति अनुष्ठातृविशेषज्ञातव्येत्यर्थः। यावदाकाराः प्राप्यप्राप्तृनिष्ठा विवक्षिताः असकृदुक्तिरिति एतत्प्रधानप्रश्नोत्तरमारभ्योक्ता न्यूनतेत्यर्थः।

सञ्ज० इति रामानुजीयाः, न्यूनाश्चेत् सर्वमन्त्राणां शास्त्रसम्मतमोक्षदातृत्वाविशेषेण कुतो न्यूनतेति अवान्तरप्रश्नस्यापि मोक्षसाधनीभूताऽनुष्ठातृ-विशेषापेक्षित-यावदाकाराप्रतिपादकत्वेन ततोऽप्यधिक-तादृशाकारप्रतिपादकमन्त्रविशेषापेक्षया न्यूनता। अथादृष्टद्वारेणाकाराप्रतिपादकतासाम्येऽपि अनुष्ठातृविशेषैरस्मत्सम्प्रदायिभिरनन्योपायत्वभङ्गासहैरनाश्रयणीयत्वेन च न्यूनतेत्युत्तरमुक्तम्। तत्रोच्यते, तादृश-यावदाकाराप्रतिपादकत्वं तु सर्वेषां मन्त्राणां समानमेव अनन्योपायत्वभञ्जकत्वेनानाश्रयणीयतायां तु केषाञ्चिदप्याश्रयणं कथम् अनन्यत्वस्य सापेक्षाऽन्यत्वगर्भत्वात् यथाकथञ्चिदनन्यत्वे परिगृह्यमाणेऽपि लोष्टादिव्यवच्छेदकधर्मवत्त्वेन तेनैव तस्याप्यन्यत्वसम्भवेनानन्यत्वभङ्गस्य दुर्वारत्वात्। एवं च यत्किञ्चिदुपाये परिगृह्यमाणे आपेक्षिकानन्यत्वसम्भवो यथातथोपायान्तरेऽपीति कुतो न्यूनतेति हेतुपर्य्यनुयोगस्तदवस्थ एवेति सूक्ष्मदृशावलोकनीयमिति तत्खण्डनम् इति।

व्या० मोक्षसाधनीभूतानुष्ठातृविशेषापेक्षितेत्यादिना न्यून-

नेत्यन्तेनास्मदुक्तानुवादो भ्रान्तिकृतः शब्दमात्रस्यादृष्टद्वारार्थ-प्रतिपादकत्वं कोऽप्यजडो न ब्रूयात् । किं चानाश्रयणीयत्वेन च न्यूनतेति कथं न्यूनता हि अनाश्रयणीताहेतुः अन्यथाऽनाश्रयणीयत्वेन न्यूनत्वं न्यूनत्वेन चानाश्रयणीयत्वमित्यन्योन्याश्रयात् । तत्रोच्यत इत्यादिकमसत् वक्ष्यमाणयुक्तेः तादृश-यावदाकाराप्रतिपादकत्वं त्वित्यादिना सर्वमन्त्राणां साम्यमुक्तं तन्न समीचीनं तादृशाकारज्ञानमन्तरा तत्प्रतिपादकत्वाप्रतिपादकत्वविचारासम्भवात् अनन्योपायत्वभञ्जकत्वेन तेषामनाश्रयणीयत्वेऽपि नान्येषां तदापत्तिः तेषामनन्योपायत्वभञ्जकत्वाभावस्यानन्योपायत्वनिर्वचनेन स्पष्टीकर्तव्यत्वात्, अनन्यत्वस्य सापेक्षान्यत्वगर्भत्वेऽपि न काचिदनुपपत्तिः, अन्योपायशब्देन विष्णुपुराणाद्युक्त-कर्मभावना-ब्रह्मभावना-तदुभयभावनारूप-भावनात्रयान्वय्यनुयाय्यधिकार-बोधगन्धशून्य-सिद्धोपायातिरिक्तादृष्टद्वारकमोक्षोपायानां विवक्षिततया तादृशान्योपायानर्हतारूपानन्योपायत्वस्य भङ्गोऽदृष्टद्वारा मोक्षोपायतया प्रसिद्धानां रामकृष्णादिमन्त्राणां मोक्षार्थमाश्रयणे भवेत् । न तु दृष्टद्वारा मोक्षोपायभूतानामस्मदाचार्य्यपरम्परा-प्राप्तानां मन्त्राणामाश्रयणे तादृशाधिकारिविशेषावश्यज्ञातव्य-यावदर्थप्रतिपादकतया रामकृष्णादिमन्त्राणामधिकारिविशेषोपजीव्यत्वं न सम्भवत्येवातो न तेषां दृष्टद्वारा मोक्षसाधनत्वकल्पना युक्ता । ननु 'ऐहलौकिकमैश्वर्य्यम्' इत्यादिनाऽदृष्टद्वारा मोक्षसाधनत्वं भवदुक्तमन्त्राणामपि तुल्यमेव न चैहिकाद्यैश्वर्य्यं प्रति तस्यादृष्टद्वारोपायत्वेऽपि

मोक्षसाधनत्वमुत्तराद्धोक्तं दृष्टद्वारकमेवेति वाच्यम्, सकृत् श्रुतस्य बाधयिष्यतीति पदस्यार्थवैषम्यासम्भवात्, तथा चैतन्मन्त्राश्रयणेऽपि तादृशाकारभङ्गोऽवर्जनीय इति चेन्न अदृष्टद्वारा मोक्षोपायतया स्वीकारे तेषामपि तद्भञ्जकत्वस्येष्टत्वात् । न ह्यभिसन्धिविशेषवतामदृष्टद्वारा मोक्षोपायत्वसद्भावमात्रं तद्भञ्जकम् । स्वर्गादिफलकामैरनुष्ठीयमानानां स्वर्गादिसाधनानां ज्योतिष्टोमादिकर्मणाम् "एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते" इति श्रुतिपतितपापशब्देनानिष्टफलजनकत्वरूपप्रवृत्तिनिमित्तपौष्कल्येन संगृहीतानामपि ज्ञानार्थतयाऽनुष्ठितानां पापत्वं यथा तथा प्रकृतेऽपि तद्भञ्जकत्वाभावसम्भवात् । अतो यथाकथञ्चिदित्यादिकम् एवं यत्किञ्चिदित्यादिकमपि दूरतोऽपास्तम् । एवमपि यदि हेतुपर्य्यनुयोगस्तिष्ठति तदा इति तत्खण्डनम् इति मन्त्रवददृष्टद्वारा तन्निर्वर्तकमन्त्रविशेषोऽभ्यसनीय इति ।

प्रश्न० प्रशंसापरयतोपपत्तिस्तु समानैव परस्परभिन्नभिन्नमन्त्रग्रहणकर्त्तुरिति ।

दुर्ज० इति चतुर्थं वाक्यम् । अत्र प्रशंसाशब्देनाविद्यमानगुणाभिधानरूपा स्तुतिर्वा विद्यमान-गुणाभिधानरूपा वा ? नाद्यः । न हि कश्चित्प्रमाणपरतन्त्र आस्तिको रामकृष्णादिमन्त्राणां तापिन्यादिश्रुतिशत-तदुपबृंहणपुराणेतिहासादिवचनशतसिद्धं प्रतिषेधगन्धशून्यमदृष्टद्वारकमोक्षसाधनत्वमविद्यमानं ब्रूयात् । न द्वितीयः, विद्यमानार्थाऽभिधानरूपप्रशंसायास्तु कस्यापि दोषावहत्वाभावादिति ।

टी० "प्रजापतिरात्मनो वपामुदक्खिदत् यावाधः स्रवन्ते उत्तानपादा गावो वहन्ति" इत्यादिः कर्मविशेषप्रशंसाऽविद्यमानगुणाभिधानरूपा "वायुमेव स्वेन भागधेयेनोपधावति, स एवैनं भूतिं गमयति" इत्यादिः कर्मविशेषप्रशंसाऽन्या तदेतदभिप्रेत्य विकल्पयति। अत्र प्रशंसाशब्देनेत्यादिना न हि कश्चिदिति उच्छृंखलनास्तिकानामेव श्रुतिस्मृतिपुराणेतिहासप्रमिताऽबाधितार्थापलापो युक्त इति भावः। कस्यापीति मन्त्रस्येति शेषः।

सच्च० इति रामानुजीयाः, प्रशंसापरतोपपत्तिस्तु परस्परभिन्नभिन्नमन्त्रग्रहणकर्त्तुरित्यवान्तर-वाक्यस्याविद्यमानगुणवचनत्वेन विद्यमानगुणवचनत्वेन च द्विधा प्रशंसाशब्दार्थमुक्त्वोभयत्राप्यश्रद्धेयत्वश्रद्धेयत्वे च दोषत्वेन संप्रदर्श्य किमभिप्रायकं प्रतिवाक्यमुपन्यस्तं तत्र विद्मः अस्मद्वाक्यस्याभिप्रायस्तु सर्वोपायानामुपेयोत्पादनेऽनुत्तमतयैव प्रतिपादनम्। तदन्योपायेषु हेयत्वप्रतिपादनं चोभयप्रामाण्यादनुपपन्नम्। अतो न तादृशप्रशंसानिन्दादौ च किञ्चित् तात्पर्य्यं, किन्तु समानफलकपरस्परविरुद्धयुगपदनुष्ठानानर्हानेककारणसामग्री-प्रशंसानिन्दार्थकशब्दस्य समवधाने विक्षेपाभावायाऽधिकारिभेदेन तत्तत्स्तुतिनिन्दाभ्यां विधिनिषेधसङ्गताभ्यां विधिनिषेधोद्देश्यप्रसाधने चोपकाराङ्गेऽतः प्रमाणीभूतोभयप्रतिपादनोपपत्तिरेवेत्यतो भवदुक्तार्थे प्रशंसानिन्दार्थक-शब्दयोस्तात्पर्य्यावगतौ वायुर्वै क्षेपिष्ठेत्यादिश्रुतिवाक्यानामुन्मत्तप्रलापताप्यापद्येत। न हि विद्यमानगुणाभिधानेनाविद्यमानगुणाभिधानेन वा पिष्टपेषणं

तत्र विवक्षितमिति । अत इदमेव श्रेयो नान्यदित्युक्ते प्रमाणी-भूत-श्रुतिस्मृत्यादौ तदनुष्ठानावश्यकत्वप्रतिपादनपरतयोपपत्तौ कुतो न्यूनतेति पुनरस्मत्प्रश्नोऽदत्तोत्तरः प्रत्यवस्थित इति विभाव्यतामिति तत्खण्डनम् इति ।

व्या० अविद्यमानगुणवचनत्वेनेत्यादि न विद्म इत्यन्तं सत्य-मुक्तं भवद्भिः । अयमस्माकमभिप्रायः, सर्वमन्त्राणां शास्त्रसम्मत-मोक्षदातृत्वाविशेषेणेति तृतीयवाक्यखण्डेन रामकृष्णादिमन्त्राणां सर्वेषां मोक्षहेतुत्वस्य प्रामाणिकतया तत्र कस्यचित् न्यूनता न सम्भवतीत्यभिप्रेत्य कथं न्यूनतेत्युक्तम् । 'यदि रामकृष्णादि-मन्त्राणां वस्तुतो मोक्षसाधनत्वं नास्त्येव तद्बोधकवाक्यं तु प्रशंसा-मात्रमिति यदि ब्रूयास्तदा युष्मत्सम्प्रदायागतमन्त्राणां मोक्ष-साधनत्वबोधकप्रमाणमेव प्रशंसेति किं न स्यादित्यभिप्रायेण प्रशंसापरतोपपत्तिस्तु समानैवेत्यनेनोक्तम् प्रशंसापरतया राम-कृष्णादिमन्त्राणां मोक्षकारणताबोधकप्रमाणानामुपपत्तिसम्पा-दने भवन्मन्त्राणामेव तथा किं न स्यादिति समानैवेत्युक्तमिति । यदीदानीमन्यथैवोदत्तरमभिप्रायं वर्णयन्ति भवन्तस्तदा तत्रा-प्युच्यते । यत्तु सर्वोपायानामित्यादि तात्पर्य्यमित्यन्तं न सम्यक् स्तावकवाक्यस्य प्रशंसायान्तात्पर्य्याभावे अर्थवादाधिकरणमेवा-नुपपन्नं स्यात् । तत्र हि "सोरोदीत् यदरोदीत् तद्रुद्रस्य रुद्र-त्वम्" "प्रजापतिरात्मनो वपामुदखिदत देवा वै देवयजनमध्य-वसायदिशो न प्रजानन्" इत्यादिवाक्यानि न क्रियामवगम-यन्ति । क्रियासम्बद्धं वा किञ्चित् भूतमर्थमन्वाचक्षते "इदित-

वान् रुद्रः वपामुत्खिदेद प्रजापतिः देवा वै दिशो न प्रजज्ञिरे" इति तानि वाक्यानि न प्रमाणमिति पूर्वपक्षं कृत्वा अप्रामाण्याऽनुपपत्तिः। प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येतेत्यनेन सामान्यतः शास्त्रदृष्टविरोधाच्चेति पूर्वपक्षसूत्रोक्तं विरोधं परिहृत्य गुणवादस्त्वित्यादिना प्रशंसापरतया प्रामाण्यं व्यवस्थापितम्। तदुक्तं शवरस्वामिना "विधेयस्य प्ररोचनार्थास्तुतिः" इति कथं पुनरनुत्खिन्नायां वपायां प्रजापतिरात्मनो वपामुदखिददित्याह उच्यते असद्वृत्तान्तान्वाख्यानं स्तुत्यर्थेन प्रशंसया गम्यमानत्वादिति च अन्यस्य हेयत्वप्रतिपादनस्य च प्रकृतप्रशंसायां तात्पर्य्यम्। उदिताऽनुदितहोमनिन्दास्थलेन हि निन्दा निन्दितुं प्रवर्त्ततेऽपि तु निन्दितादितरत् स्तोतुमिति न्यायमभिदधते मीमांसकाः। किन्तु समानफलकेत्यादिकमयोग्यार्थकम् कुतः परस्परविरुद्धयुगपदनुष्ठानार्हानेककारणसामग्रीसमवधानस्यासम्भवात् तादृशसामग्रीसमवधाने हि उत्तरकाले कार्य्यमुभाभ्यामवश्यं भवतीत्येव वक्तव्यम्। कार्य्याव्यवहितप्राक्काले विद्यमानकारणकलापस्यैव सामग्रीपदार्थत्वात् कारणकलापस्यैव सामग्रीपदार्थतया कारणेति व्यर्थम्। किं च तदन्योपायेषु हेयत्वप्रतिपादनरूपा निन्दा च न निषेधसंगतावहितेषु फलसाधनेषु निषेधासम्भवात्, किन्तु "तस्माद्बर्हिषि रजतं न देयम्" इति रजतदानं प्रतिषिध्य तच्छेषतया निन्दा कृता "सोरोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वं तस्य यदश्रु अशीर्यत तद्रजतमभूत् योबर्हिषि रजतं

दद्यात् पुरास्य संवत्सरात् गृहे रोदनं भवति" इति विधि-निषेधोद्देश्यप्रसाधने चोपकाराङ्गे इत्यपि न विध्युद्देश्यसत्त्वेऽपि निषेधोद्देश्यासत्त्वात्। अतः प्रमाणीभूतेत्यादिकं तु नानिष्टम्। अतो भवदुक्तार्थे प्रशंसा-निन्दार्थकशब्दयोरित्यादिकमप्यसमीचीनम्। प्ररोचनाद्वेषार्थत्वात् तयोः, तयोश्च प्रवृत्तिनिवृत्ती प्रयोजनम्। तदुक्तं स्वामिना "इहान्वाख्याने वर्त्तमाने इदं निष्पद्यते यत्र वृत्तान्तज्ञानं यत्र कस्मिंश्चित् प्ररोचनाद्वेषो वा तत्र वृत्तान्तान्वाख्यानं न प्रवर्त्तकं न निवर्त्तकं च इति प्रयोजनाभावादनर्थकमित्यविवक्षितं प्ररोचनया तु प्रवर्त्तते द्वेषान्निवर्त्तते इति तयोर्विवक्षेति एतेन वायुर्वै क्षेपिष्ठेत्यादि न वा पिष्टपेषणं तत्र विवक्षितमित्युक्तं निरस्तम्। अत इत्यादिकमपि न सत् न्यूनताया अन्यदृश्या असत्तादुक्ततया तस्यास्तु केनापि प्रमाणेन विरोधाभावात् इत्यलं पल्लवितेन।

प्रश्न॰ शैवशाक्तमन्त्राणां मोक्षदातृत्वमस्ति न वा?

दुर्ज॰ इति पञ्चमं वाक्यम्, तत्रोत्तरम्, नास्ति तेषां साक्षान्मोक्षप्रदत्त्वम्। तथा हि मन्त्राणां मोक्षप्रदत्त्वं हि तत्प्रतिपाद्य-प्रधानदेवता-प्रसादद्वारा वक्तव्यम्। वैष्णवधर्मप्रतिपादने-दम्पर्य्येणाप्रवृत्तेराजसमध्य-परिगणिते मत्स्यपुराणे,—

"यस्मिन् कल्पे च यत्प्रोक्तं पुराणं ब्रह्मणा पुरा।
तस्य तस्य च माहात्म्यं तत्स्वरूपेण वर्ण्यते॥
अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम्।
राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः॥

सङ्कीर्णेषु सरस्वत्याः पितृणां च निगद्यते ।
सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः ॥
तेष्वेव योगसंसिद्धा गच्छन्ति परमां गतिम् ।"

इति श्रूयते तस्यायमर्थः । ब्रह्मणो ह्यहानि तत्तद्गुणप्रधानानि भवन्ति । यदहःप्रारम्भे यस्य गुणस्योद्रेको ब्रह्मणः तत्प्रधानं तदहरित्युच्यते, यस्मिन् कल्पे यद्गुणप्रधानेऽह्नि यत्पुराणं प्रकटितं, तेन पुराणेन तद्गुणप्रधानकदेवतामाहात्म्यं प्रतिपाद्यते । तमःप्रधानाहःप्रकटीकृतेषु पुराणेषु तमःप्रधानस्य रुद्रस्याग्नेश्च माहात्म्यमुच्यते । एवमुत्तरत्रापि तेष्वेवेत्यत्रैवकारो भिन्नक्रमः तेषु योगसंसिद्धा एव परां गतिं लभन्ते । अत्र योगशब्देनोपाय उच्यते, "योगः संनहनोपायध्यानसङ्गति-युक्तिषु" इति कोशात् । तथा च सात्त्विकपुराणप्रतिपाद्य-भगवद्धरि-माहात्म्य-ज्ञानाधीन-तद्विषय-ध्यानादिरूपोपाय-विशेषवतामेव मोक्षरूपपरमपुरुषार्थावाप्तिरिति । किं च

"पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथ वा पुनः ।
रजसा तमसा चैव मानसं समभिप्लुतम् ॥
जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
सत्त्वस्यैष प्रवर्तकः——————"

इत्यादिवचनशतेन भगवतो विष्णोरेव सत्त्वोद्रेक-तदधीनमोक्ष-

द्धि-तदर्थमोचशास्त्रविचार-तदर्थाऽनुष्ठानद्वारा मोचप्रदत्वस्य प्रतिपादितत्वात् शिवशक्त्यादीनामुक्तरीत्या मोचप्रदत्वस्यास-म्भव एवेति कथं तन्मन्त्राणां जपहोमादिद्वारा स्वप्रतिपाद्येषु प्रधानीभूताया देवतायाः प्रसादमुत्पाद्य मोचसाधनत्वमिति।

टी॰ साचान्मोचप्रदत्वमिति परम्परया मोचप्रदत्वस्य वच्य-माणत्वात् साचादित्युक्तम्। तच्च स्वप्रतिपाद्य-देवताप्रसादा-धीनदेवतान्तरप्रसादाद्वारकत्वम्। तादृशमोचप्रदत्वासम्भवमुप-पादयति, तथा ह्यत्यादिना देवतानिष्ठमोचप्रदत्वविलचणं मन्त्राणां मोचप्रदत्वमाह,—मन्त्राणां मोचप्रदत्वं हीत्यादीना। स्वप्रतिपाद्येत्यादि स्वप्रतिपाद्येषु प्रधानीभूताया देवतायाः प्रसादद्वारेत्यर्थः। अत्र प्रधानशब्देनार्थप्राधान्यं विवचितं देवतायाः शाब्दप्राधान्यासम्भवात् तत्तद्गुणप्रधानानीति ताम-सादिगुणप्रधानानीत्यर्थः। अङ्गः कालस्य सत्त्वादिगुणशून्यस्य कथं सत्त्वादिगुणप्रधानत्वमित्याशंक्याह,—यदहःप्रारम्भे इ-त्यादि। उत्तरत्रापीति राजसेषु च कल्पेषु सङ्कीर्णेषु सात्वि केषु च कल्पेषु इत्यत्रेत्यर्थः। अत्रैवकारस्य स्वस्थानान्वये श्रुत्याद्युक्तयोगव्यवच्छेदो जायेतेति भिन्नक्रमत्वमाह, एव कार-इति। तेषु योगसंसिद्धा एवेति तेषु योगः तत्प्रतिपाद्यो यो हरिध्यानादिरूपो योगस्तत्संसिद्धा एवेत्यर्थः। परां गतिमि-त्यत्र गम्यत इति गतिरिति व्युत्पत्त्या प्राप्यवाची गतिशब्दः योगशब्दार्थमाहाहेति। प्रकृतोपयोगि-पर्य्यवसन्नार्थमाह,— तथा चेत्यादिना। ध्यानादीत्यादिशब्देन परभक्ति-परज्ञान-

परभक्त्याद्यवस्थाविशेषा उच्यन्ते, भगवतो हरेर्मोक्षप्रदत्वे प्रणालीं रुद्रादीनां तदसम्भवं चाह, पश्यत्येनमित्यादिना। अयमत्र-मभिप्रायः। भगवतः फलमत उपपत्तेः अमृतस्यैष सेतुरित्यादिभिः प्रतिपादितं साक्षान्मोक्षप्रदत्वम् "एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति ददामि बुद्धियोगं तं येन मामुपयन्ति ते" इत्यादिभिरुक्तं जायमानकटाक्षसत्त्वोद्रेकमोक्षरुचिज्ञानिपुरुषोपसत्तिमोक्षशास्त्रविचारतदर्थानुष्ठान-तदधीनप्रसादप्रणाल्या मोक्षप्रदत्वं चेति। अत्र जायमानमित्यर्थेन जायमानकटाक्ष उक्तः। सात्विकः स तु विज्ञेय इत्यनेन सत्त्वोद्रेक उक्तः मोक्षार्थीत्यादिना मोक्षरुचिज्ञानिपुरुषोपसत्तिमोक्षशास्त्रविचारा उक्ताः। देवतान्तराणां तादृशप्रणाल्यापि मोक्षप्रदत्वं न सम्भवतीत्याह शिवशक्त्यादीनामित्यादिना कथं तन्मन्त्राणामिति तेषां मोक्षप्रदत्वाभावः कैमुत्यन्यायसिद्ध इति भावः। उक्तप्रणालीप्रविष्टोपसत्त्यनुयोगिज्ञानिपुरुषत्वेन तत्कृतमोक्षशास्त्रोपदेशस्य पौराणिकोक्तस्य नानुपपत्तिः।

सज्ज० इति रामानुजीयाः शैवशाक्तमन्त्राणां मोक्षदातृत्वमस्ति न वेति अवान्तरवाक्यस्यातिसाहसेन नास्ति तेषां साक्षान्मोक्षदातृत्वमिति निष्ठुरवाक्येन साक्षादित्यधिकांशघटितेनोत्तरं दत्तम्। तदुपपादनोपक्रमे च मन्त्राणां मोक्षप्रदत्वं तत्प्रतिपाद्यप्रधानदेवताप्रसादद्वारेत्युक्तम्। तत्रोच्यते मोक्षोनाम सकलदुःखापरपर्यायबन्धनिवृत्तिः। तत्र बन्धस्य सत्यत्वेन निवृत्त्यसम्भवेनाध्यस्तत्वं वाच्यम्। तस्य च ज्ञानादेव सन्निवृत्तिसम्भ-

शेन तादृशज्ञानजननमात्रे मन्त्रदैवतप्रभृतीनां सर्वेषामेकरूपेणै-वोपयोगसम्भवे सति किं कारणं तत्प्रसादद्वारा मन्त्राणां मोक्ष-प्रदत्वं नादृष्टद्वारेति तथा यस्य कस्यचिदुपायस्य तामसत्वराज-सत्वादिपरिकल्पनेन मोक्षाप्रदत्वकल्पनमपि नोचितम्। तामस-त्वादि विभावनस्य निर्मूलत्वात्, समूलत्वेऽपि तथा च सात्विक-पुराणप्रतिपाद्य-भगवद्धरिमाहात्म्य-ज्ञानाधीनतद्विषयध्यानादि-रूपोपायविशेषतामोक्षरूपपरमपुरुषार्थावाप्तिरिति वाक्यप्रव-न्धेन हरिमाहात्म्यज्ञानाधीनतद्विषयध्यानादिरूपोपायविशे-षस्यैव मोक्षरूपपरमपुरुषार्थत्व-प्रतिपादनाय विशेषतामेव मोक्ष-प्राप्तिरित्यसम्बद्धं द्रविड़भाषणवदस्माकम बोधकं यल्लिखितं तल्ले-खकप्रमादादस्मादृशानां व्यामोहायैव वा। भवतु नाम वयं तद-नादृत्य विवक्षितार्थं यथाकथञ्चिदङ्गापि तादृशार्थे दृढ़तर-प्रमाणालाभात् न स्वीकर्तुं शक्नुमो यत्सात्विकत्वादिकं तत्र हेतुत्व-नोक्तं तस्य शैवशाक्तमन्त्रेष्वपि तेजोमयत्वेन दैवतवत्सम्भवेत् तत्रास्वीकारो भवतां निर्मूल एव। यदि च तत्प्रतिपाद्यदैवतयो-स्तामसप्रकृतित्वान्न तथात्वमित्युच्यते तदा सात्विकत्वस्याप्यदैवत-त्वतामसत्वयोः परस्परविरुद्धत्वादेकत्र समावेशासम्भवेन दैवतत्वं स्वीकृत्य तामसत्वपरिकल्पनं व्यामोहविलसितमेव प्रतिभाति। किं च गुणविभागकल्पनाया व्यवहारिकत्वेन तच्च व्यवहारस्य बन्धकारणजागरूकत्वात् मोक्षासम्भवेन परमार्थदशायां गुण-शून्यायां सत्वस्याप्यसम्भवेन मोक्षस्य तु तत्रैवोपपत्त्या शिवनाम्नो निर्गुणस्य परमात्मनः शक्तिनाम्नो विष्णुनाम्न एव वा स्वस्वरूपा-

वाच्यपरपर्यायमोक्षसम्पादक-ज्ञानावरकाविद्यानिरसनपूर्वकावि-षयविषया निरुक्त-स्वस्वरूपप्रदर्शनेन मोक्षदातृत्वसम्भवेन सत्वादि-गुणाविष्टानां स्वयमनिर्मुक्तानां केषाञ्चिदप्यस्मदादिवत् मोक्ष-दातृत्वासम्भवेन च विष्णोस्तथात्वं नेतरेषामिति भवतां स्व-कपोलकल्पितवल्गितमेव न तत्र विनिगमकं किञ्चिदुपलभ्यते। न च स्वानुध्यानार्चादिकर्तृजनान्तःकरणशोधनपूर्वकज्ञानप्रदातृ-त्वेन मोक्षप्रदातृत्वं रामकृष्णादिमन्त्राणां सात्विकस्याधिष्ठातृ-देवतास्मारकत्वादिति वाच्यम्, नमः शिवायेति मन्त्राणामपि सात्विकस्याधिष्ठातृदेवतास्मारकत्वस्य तुल्यत्वात् मत्स्यपुराणीय-वाक्यानामसुराणामधःपातनपरत्वस्यैव निश्चितत्वात् विष्णुशिव-योरभेदप्रतिपादकभारतादिवाक्येभ्य इति तत्खण्डनमिति ।

व्या० यत्तु अतिसाहसेन निष्ठुरवाक्येनेति चोक्तम् तत्सत्यं किं कुर्मो वयं प्रथममेव भवद्भिरस्य प्रश्नस्यास्मद्धृदय एवं वर्तते तदनुगुणमेवोत्तरं भवद्भिर्देयमिति वयं प्रार्थिताश्चेत् तथैव न ब्रूयात् सत्यमप्रियमिति वचनार्थं विचार्यैव प्रियं च नानृतं ब्रूयादिति वाक्यार्थं विस्मृत्यापि भवद्धृदयानुसारेणोत्तरमवो-चाम इदानीं तु

"अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ।"

इति वाक्यार्थैकदेशदौर्लभ्यं दूरीकृत-नेत्रचिकित्सकः खलु अति-निष्ठुरोभूत्वा नेत्रदोषनिवारणाय निष्ठुरलोहशलाकादिकमति-सुकुमारे नेत्रे व्यापारयति। किं च तत्तन्मन्त्रजपादिप्रसन्नदेवता-प्रसादितविष्णुप्रसादद्वारा मोक्षदातृत्वस्य शास्त्रसम्मतत्वाद्ब्रह्म-

मागत्वाच्च साचादित्यधिकांशघटनं युक्तमेव। तत्रोच्यते मोक्षो-
नामेत्यादिगोमुखप्रतिकृत्या शार्दूलमुखाच्छादनसदृशं सकल-
दुःखापरपर्य्यायबन्धनिवृत्तिरस्तु मोक्षस्तस्य सत्यत्वे निवृत्त्यस-
म्भवः कथं किं सर्पाधिष्ठानरज्ज्वादेः स्वसमसत्ताकेनोपायविशे-
षेण निवृत्तिर्न दृश्यते अस्त्वध्यस्तत्वं तस्य च ज्ञानादेव निवृत्तिः
तथापि तादृशज्ञानजनने तत्त्वमस्यादि-वाक्यानामेव ससहकारि-
विशेषाणां सामर्थ्यमिति घण्टाघोषः। एवं च सति कस्य वा
मन्त्रस्य दैवतस्योपयोगः सम्भवतीति भवान् ब्रवीति न च नमः
शिवायेत्यादिमन्त्राणामपि स्वानुध्यानार्चनादिकर्तृजनान्तःकर-
णशोधनपूर्वकज्ञानप्रदातृत्वेनेत्यादिना तादृशमन्त्रदेवतानामपि
ज्ञानोत्पादनसामर्थ्यं वच्यत इति वाच्यम्, अन्तःकरणशोधनं
नाम 'सत्वात्सञ्जायते ज्ञानम्' इत्युक्तप्रकारेण ज्ञानोत्पत्तिहेतु-
सत्वाभिवृद्धिप्रतिबन्धक-रजस्तमोनिर्वर्हणमेव। तच्च राजस-
तामसप्रकृतीनां तन्मन्त्राणां च न सम्भवत्येवेत्यवेहि किं कारण-
मित्यादिकमसत् मीमांसकाद्यङ्गीकृतादृष्टपदार्थस्थाने देवताप्रसा-
दस्याभिषिक्तत्वात्। यत्तु यस्य कस्यचिदित्यादिनिर्मूलत्वादि-
त्यन्तं तन्न सत्, उक्तप्रमाणानां

"सत्वं रजस्तम इति प्रकृतेर्गुणास्तै-
युक्तः परः पुरुष एक इहास्य धत्ते।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः॥"

इत्यादिभागवतभारतादिवचनानां च स्वार्थप्रामाण्यान्यार्थत्व-

कल्पनादिरूपान्यथा-सिद्ध्युपपादनमन्तरा तामसत्वादिविभाव-
नस्य निर्मूलत्वाभिधानस्यानुचितत्वात् समूलत्वेऽपीत्यादि अस्मा-
दृशानां व्यामोहायैव वेत्यन्तमतितुच्छम् । तथा चेत्यारभ्य
तद्विषयध्यानादिरूपोपाय-विशेषवतामेव मोक्षरूपपरमपुरुषा-
वाप्तिरित्यस्माभिर्लिखितं लेखकप्रमादादागतं वा तत्खण्डन-
मिति मन्त्रजपप्रतिष्ठार्थं वोपायविशेषतामेवेति परस्परा-
नन्वितपाठं परिकल्प्य ध्यानादिरूपोपायविशेषस्यैव मोक्षरूप-
परमपुरुषार्थत्वप्रतिपादनार्थेति तदननुरूपमेवार्थमप्युक्त्वाऽसंबद्ध-
मित्याद्यभिधानात् । किं च यथा कथञ्चिद् बुद्ध्यापीत्यादिक-
मपि सर्वत्राबुद्ध्वैव प्रतिवदतां श्रीमतां युक्तमेव तादृशार्थे दृढ-
तरप्रमाणाभावान्न स्वीकर्तुं शक्यम इत्ययुक्तम् । प्रमाणस्य दार्ढ्यं
हि प्रागुक्तान्यथासिद्धिसम्भावनाशून्यत्वम् । अन्यथासिद्धिश्च भव-
द्भिर्नोद्घाटितेति अस्मदुदाहृतप्रमाणानि तज्जातीयकानि चानु-
क्तानि प्रमाणानि दृढ़ान्येव यदि भवन्तो न स्वीकुर्वन्ति तदापि
प्रामाणिकाः स्वीकुर्युरेव, यद्यपि भवतामपि प्रामाणिकत्वम-
स्त्येव तथापि मात्सर्याहङ्कारेर्ष्यादिदोषास्तत्तिरस्कुर्वन्ति । यत्सा-
त्विकत्वादिकमित्यादिर्निर्मूल एवेत्यन्तं न सत् शैवशाक्तमन्त्रेषु
शब्दमयेषु तेजःकारण-वायुकारणाकाशगुणेषु कथं तेजोमयत्वम् ?
अस्तु वा कथमपि, तथापि किं तेजसः तामसत्वं न सम्भ-
वति । न हि वयं विष्णुमन्त्राणां शैवशाक्तमन्त्रेष्वपीत्यपिना
दृष्टान्ततया संगृहीतानां तेजोमयत्वेन सात्विकत्वं ब्रूमः, तथा
केनाप्यनङ्गीकारात्, किन्तु तत्तन्मन्त्रदेवताप्रकृत्या मन्त्राणां

तामसत्वादिव्यवहारः। यदि चेत्यादिकमप्यत्यन्तमसमीचीनम्,
दैवतत्वस्य सात्त्विकत्वव्याप्तेर्विरोधी तद्व्यभिचारो ब्रह्मादिदेवता-
प्रकृतिविशेषनिर्णयप्रवृत्त-भृगुमहर्षिचरित्रेण प्रकटीकृतः सर्वै-
रितिहासिकैः पौराणिकैश्च। तथा सति तामसत्वदैवतत्वयोर्विरोध
एव नास्तीति कस्य व्यामोह उच्यताम्। किं चेत्यादि वल्गित-
मेवेत्यन्तं शिवशम्भ्वादिमन्त्राणां साक्षान्मोक्षप्रदत्व-व्यवस्थापने
प्रवृत्तानां भवतां वाक्यं पुत्रार्थं तपस्यन्त्याः सत्याः पतिमरण-
वरप्रार्थनसदृशं गुणविभागकल्पनाया व्यवहारिकत्वे मन्त्रादे-
रपि व्यवहारिकतया परमार्थदशायां तस्याप्यसम्भवात् बन्ध-
दशायामसम्भवन् परमार्थदशायां सम्भवन्मोक्ष उपायानुष्ठान-
दशात्मकबन्धदशायां गुणविभागं कथं दूरीकुर्य्यात्। तथा
सति सर्वदाऽनिर्मोक्ष एव स्यात्, उपायानुष्ठानाभावात्। एवं
शिवः शिवोऽभूदित्यादिप्रसिद्धशिवनामा कथं निर्गुणः स्यात्।
यदि च न सत् न चासच्छिव एव केवलः शम्भुराकाशमध्ये ध्येय
इत्यादिप्रसिद्धशिवनाम्नो निर्गुणत्वमित्युच्यते, तदा श्वेताश्वतरा-
द्युपनिषदामुपक्रमोपसंहारादिषड्विध-तात्पर्य्य-निर्णय-लिङ्गै-
र्नार्थनिर्णयेऽमुकः शिवनामेति निर्णयो भविष्यति कारणवाक्य-
गताकाशादिपदानामिव शिवशम्भ्वादिपदानामपि सामान्यवा-
चकानां नारायणशब्दवाच्ये विशेषे परब्रह्मणि पर्य्यवसानस्य
वक्तव्यत्वात्। एवं स्वस्वरूपावाप्तिपरपर्य्यायो मोक्ष इदानी-
मुच्यते, सकलदुःखापरपर्य्यायबन्धनिवृत्तिर्मोक्ष इति प्रागुक्तम्।
तत्र तदुभयं पृथगेव मोक्षो वोभयोरैक्यं वान्यतरस्य मोक्षत्वं

वेति निरूपणीयम्। किं च ज्ञानावरकाविद्यानिरसनपूर्वका-विषयविधया निरुक्त-स्वस्वरूपप्रदर्शनेनेति न सङ्गच्छते। स्वस्व-रूपस्याविषयत्वे कथं तत्प्रदर्शनं प्रदर्शनं खलु प्रामकस्य वाऽन्यस्य वा ज्ञानस्य विषयत्वापादनम्। घटं प्रदर्शयतीत्यादौ तथा दर्शनात्, तच्चाविषयविधया न सम्भवति, निरसनपूर्वकेत्यस्य त्वदभिमतः स्वस्वरूपप्रदर्शनेऽन्वयो न सम्भवति, अविषयविध-येत्यत्रान्वयोऽपि न सम्भवति, अविद्यानिरसनस्याविषयत्वानापा-दकत्वात् तत्पूर्वत्वाभावाच्च अकारं लेखकप्रमादकृतं स्वीकृत्य विषयिविधयेत्युक्तौ पुनरव्यावर्तकता अनन्वितं च। किं च नि-र्गुणस्यापक्षपातिनः शिवनाम्ना मोक्षप्रदत्वं च न सम्भवति नायं भवदाश्रिताद्वैतसिद्धान्तो नापि नीलकण्ठादिभाषित-शैवसि-द्धान्तो वा यच्छिवनाम्नो मोक्षप्रदत्वं वस्तुस्य मिथ्यात्वं चेति। किं च सत्वादिगुणविशिष्टानां स्वयमनिर्मुक्तानामित्यादिकं च नृणां सत्वतनोः श्रेयोऽवाप्तिबोधकभागवतेन "एष सर्वभूतान्त-रात्मापहतपाप्मा दिव्यो देव एको नारायणः" इत्यादि-सुबालोपनिषद्वाक्येन च विरुद्धम्। स्वकपोलकल्पितत्ववचनं च श्रुतिस्मृतिपुराणेतिहासानवलोकननिबन्धनम्। न चेत्या-दिकं प्रागेव निरस्तम्। नमः शिवायेति मन्त्राधिष्ठातुः शिवस्य सात्विकत्वाभिधानं च प्रमाणविरुद्धम्। मत्स्यपुराणीय-वच-नानामित्यादिकमपि तत्पुराणीय-पूर्वापरसन्दर्भ-विरुद्धम्। तच्चासुराधःपतनस्याप्रकृतत्वात् अनिर्मुक्तत्वेनाभिहितस्य विष्णो-र्निर्गुणत्वेनाभिहितस्य शिवस्य चाभेदो हि दुर्घट इति कथं

तत्प्रतिपादकत्वं पञ्चमवेदतया प्रसिद्धस्य महाभारतस्य शास्त्र-दृष्ट्या तूपदेशो वामदेववदिति न्यायस्तु भवतां विपरीतफल इत्यलम् ।

प्रश्न० अस्ति चेत् निन्दा कथं क्रियते ? इति ।

दुर्ज० इति षष्ठं वाक्यम्, अत्रोत्तरम् । आपिपीलिकलक्षणं भगवद्विभूतिभूतपदार्थमात्रस्य निन्दा भगवत्प्रसक्तिविरोधि-तयाऽनुचितेति निन्दाभावाद्विभ्यतामस्मत्सम्प्रदायिनामुक्तमन्त्रेषु निन्दा कथं प्रसरेत् । यत्तु वैष्णवधर्मपरशास्त्रेषु विष्णुमन्त्र-माहात्म्य-निरूपणावसरे शिवादिमन्त्र-निन्दाश्रवणं तदुदिताऽ-नुदितहोमनिन्दापरवाक्यनिष्ठत्वेन न हि निन्दान्यायेन प्रकृत-मन्त्रप्रशंसार्थम् । यच्चाधिकारिविशेषनिरूपणावसरे तदधि-कारिविशेषस्य तत्तन्मन्त्रेभ्यो मनोव्यावृत्त्यर्थम् ।

टी० "ये विनिन्दन्ति भूतानि मदीयानि महामते ! ।

ते यान्ति निरयं घोरं निन्दाविभ्रष्टचेतनाः ॥"

इत्यादिकमभिप्रेत्य भगवत्प्रसक्तिविरोधितयेत्युक्तम् । भगवत्प्रमा-दैकावलम्बिनां तदसम्भव इति भावः । शिष्टं स्पष्टम् ।

सज्ज० इति रामानुजीयाः, अस्ति चेत् कथं निन्दा क्रियते ? इत्यवान्तरप्रश्नस्य वस्तुमात्रस्य किञ्चिदप्युद्देश्यं विना निन्दा न क्रियते, यत्र कुत्रचित् वैष्णवधर्मशास्त्रे निन्दाश्रवणं तद्विष्णुमन्त्रप्रशंसामुद्दिश्य अन्यत्र कुत्रचित् अधिकारिविशेषस्य मन्त्रान्तरेभ्यो मनोव्यावृत्त्यर्थमिति स्पष्टमभिधायैतत्प्रयोजन-व्यतिरेकेण निन्दाश्रवणमस्ति चेत् तत्तन्मन्त्रोपासकानां निष्क-

पटच्छदयानां तत्तन्मन्त्रोपासनाभ्रंशनेन नृशंसवदभीष्टविघातार्थ-मिति दिक्प्रदर्शनविधया प्रदर्श्य स्वस्मिन् धार्मिकवकाचार्य्यत्व-सम्पादनप्रयासाविष्कारेण यदुत्तरं दत्तम्, तत्सत्यम् । एव-मेव भवतां सम्प्रदाये श्रूयते । यत्र यत्र श्रुत्यादिविहितकर्मणां भवद्भिर्निन्दा क्रियते, तत्र सर्वत्र किञ्चित् प्रयोजनमुद्दिश्यैव न सर्वथा निष्प्रयोजनम् । परन्तु तत्प्रयोजनं सतां श्लाघ्यं भवति न वेति विचारस्य सदसद्वेशिष्ट्येन विशिष्टाद्वैतवादिनां सतोऽप्य-सतोऽपि प्रयोजनविशेषस्याभिचारादेर्ग्राह्यतया करणेऽकरणेऽपि न प्रयोजनहानिर्भवताम् । अस्माभिस्तु वेदशास्त्रपुराणादिभ्यो बिभ्यद्भिर्वेदनिन्दकानां भवादृशानामपि निन्दा कर्तुं न श-क्यते । किं पुनर्देवताविशेषाणामित्येव प्रत्युत्तरनवधार्य्यतामिति वस्तुतोऽस्माकं प्रश्नस्य सामान्यतो मोक्षप्रदातृत्वविषयकस्योत्तर-त्वेन निरुक्तमन्त्राणां साक्षान्मोक्षप्रदातृत्वनिषेधकथनमनुचित-मेव परम्परया-मोक्षप्रदातृत्वं तु सर्वसाधारणमेवेत्यलम् इति तत्खण्डनमिति ।

व्या० यत्तु वस्तुमात्रस्येत्यादिकं तद्भ्रान्तिविलसितम् भव-ताम् । यथोदितानुदितहोमनिन्दाया न निन्दायां तात्पर्य्यं, किन्तु निन्दितेतरप्रशंसायामेव, एवं प्रकृतेऽपीति वैष्णवधर्म-प्रतिपादकशास्त्रे पद्मपुराणादौ व्यवस्था कृता तदप्रज्ञायं भव-द्भिर्यथेच्छमुच्यते, चेत् को दोषः ? न हि बालकटुकालापेन महतां मनसि विकृतिः स्यात् । यदि कुत्रचिदन्यत्रापि पुरा-णादौ निन्दा श्रूयेत, तत्राप्येवमेव गतिः कल्पनीया । न हि

निन्दायाः किञ्चिदुद्देश्यं भवति, यदि निन्दाया अवश्यं किञ्चिदुद्देश्यं भवतीति भवन्तोऽभिमन्यन्ते तर्हि सर्वदा सर्वनिन्दका भवन्त एव तद्याथार्थ्यं जानन्ति। एवमुदिताऽनुदितहोमनिन्दाया अपि भवद्भिः करीत्योद्देश्यमस्ति चेदस्तु प्रकृतेऽपि। अस्माभिस्तु निन्दा न क्रियत इत्युच्यते, कूर्मपुराणादौ वैष्णवधर्मनिन्दा कृतेति न भवन्तोऽधिक्षेप्याः। वयं यदि धार्मिकवकाचार्य्यत्वं भवतां धार्मिकाकारप्रच्छन्नाखुभुजां दशचक्रिसमश्रय-क्रीड़नकश्येनानामयं प्रदर्शयामस्तदा झटिति भक्षिता भवामः। किं चैवमेवेत्याद्यसभ्यग्रामणीविवादेन न किञ्चित् फलं सिद्ध्येत् शास्त्रीययोर्निन्दास्तुत्योः फलं तत्र तत्रार्थवादाद्यधिकरणादौ विचारितं सतां श्लाघ्यमेव न सन्न चासत् यदस्ति यन्नास्ति च विप्रवर्येत्यादिश्रुतिस्मृत्यादिप्रतिपादितसदसद्द्वेशिष्ट्यं तेन च विशिष्टाद्वैतं वदामो वयं तत्र को उपालम्भः। असन्नपि सन्नपि प्रयोजनविशेषः “श्येनेनाभिचरन् यजेत” “ज्योतिष्टोमेन स्वर्गकामो यजेत” इत्यादिश्रुतिप्रतिपन्नस्तत्तदधिकारिभिर्ग्राह्य एव। अस्माभिरित्यादिकं सत्यमुक्तं भवद्भिः। सर्पादिभ्य इव वेदपुराणादिभ्यो भवन्तो बिभ्यत्यतएव वेदपुराणादिवार्तामपि न जानन्ति, किन्तु वेदवैदिकनिन्दामिदानीमपि कुर्वाणा एव न कुर्वन्त इव वदन्तीति महदिदमाश्चर्य्यम्। एवं सर्वदेवता-सार्वभौमस्य भगवतो निन्दां कुर्वन्त एव देवतान्तराणां निन्दां न कुर्वन्तीति सम्यगुत्तरमवधारितम्। किं च भवद्भिः सामान्यतो मोक्षप्रदत्वं शिवशक्त्यादिमन्त्राणामस्ति, न

वेति प्रश्नः कृतः। अस्तीति प्रत्युत्तरे दत्ते पूर्वं साक्षान्मोक्षप्रदानां रामकृष्णादिमन्त्राणां प्रस्तुततया तथैव मोक्षप्रदत्वं भवन्तो जानीयुरिति विचार्य्य साक्षान्मोक्षप्रदत्वं नास्तीत्युक्तम्। अन्यविधस्य वक्ष्यमाणतया न तदिदानीमुक्तम् परम्परया-मोक्षप्रदत्वमस्ति चेत् तेषां न तदस्माकं दूषणमिति कृतं पल्लवितेन।

प्रश्न० नास्ति चेत् तत्प्रतिपादकशास्त्रस्य का गतिः ?

दुर्ज० इति सप्तमं वाक्यम्, तत्रोत्तरं नास्त्येव तेषां मन्त्राणामुक्तरीत्या साक्षान्मोक्षप्रदत्वम्, तथापि कुण्डधारोपसक्तिन्यायेन सम्भवति हि मोक्षप्रदत्वम्। परम्परया कुण्डधारो हि कश्चिद् यक्षः धनार्थं स्वविषयकोपासनां कृतवतः कस्यचित् प्रत्यक्षीभूय धनादिरूपपुरुषार्थमल्पं मन्वानस्तेन सह देवसमितिं प्राप्य देवताः प्रार्थ्य तत्प्रसादेन ज्ञानानुष्ठानभाजं कृत्वा मोक्षभागिनमकरोदिति भारते प्रसिद्धिः। तथा शिवशक्त्यादिमन्त्रान् गृहीतुरपि तत्तद्देवताः स्वप्रसादेन मोक्षोपायानुष्ठानविरोधिरजस्तमोनिर्वर्हणसत्वाभिवृद्धिद्वारा चिराय मोक्षं सम्पादयन्तीति।

टी० साक्षान्मोक्षप्रदत्वम्, स्वजपादिप्रसन्न-स्वाधिष्ठातृदेवताप्रसादितान्यदेवताप्रसादमद्वारीकृत्य मोक्षप्रदत्वम्। परम्परया तादृशदेवतान्तरप्रसादद्वारा परम्परया मोक्षप्रदत्वमितिहासविशेषेणोपपादयति, कुण्डधारो हि नामेत्यादिना। अत्र सर्वत्र प्रमाणं भारतेऽनुसन्धेयं ग्रन्थविस्तरभिया नेह विलिख्यते, तथेत्यादि तत्तन्मन्त्राधिष्ठातृ-देवतास्तत्तन्मन्त्रजपप्रसन्ना भगवत्-

प्रसादमुत्पाद्य सत्त्वाद्यभिवृद्धिद्वारा तत्तदवस्थाविशेषानुत्पाद्य मोक्षं साधयन्तीति भावः ।

सञ्ज० इति रामानुजीयाः, नास्ति चेत् तत्प्रतिपादक-शास्त्रस्य का गतिः ? इत्यवान्तर-प्रश्नस्य कुण्डधारोपसत्ति-न्यायेन तत्प्रतिपादकशास्त्राणामुपपत्तिमुत्प्रेक्ष्य नास्त्येव साक्षान्मोक्षप्रदत्वमित्युत्तरं दत्तम्। तदत्यन्तदुराग्रहमूलमेव तथा हि समानप्रमाण्यशास्त्राणां कस्य स्वविषये साक्षात् सम्बन्धः ? कस्य परम्परेत्यत्र बलवत्तरविनिगमकाभावेन तत्तद्देवतोपासनेन चित्तशुद्धिद्वाराध्यासकारणीभूतस्य संस्कारादेर्निवृत्त्या बन्ध-कारणीभूतस्याध्यासस्यापि कारण-नाशादेव निवृत्तिसम्भवे मोक्षस्य शैवशाक्तमन्त्रोपासनेनापि सम्भवादित्यलम् इति तत्खण्डनमिति ।

व्या० कुण्डधारोपसत्तिन्यायेनेत्यादिनोत्तरमुक्तमित्यन्तेन अस्मदुक्तोत्तरार्थमनूद्य तदत्यन्तदुराग्रहमूलमेवेत्यादिकं यदुक्तम्, तत्तुच्छम् । ज्ञानान्मोक्षाभिधायिनां 'तरति शोकमात्मवित्' 'अध्यात्मयोगाधिगमेन धीरो मत्वा देवं हर्षशोकौ जहाति' 'ब्रह्मविदाप्नोति परम्' इत्यादीनां काशीमरणान्मुक्तिरित्यादीनां काशीमरणादेर्मुक्त्यभिधायिनां च शास्त्राणां प्रामाण्यस्य तुल्यत्वेऽपि प्रथमानां स्वविषये साक्षात् सम्बन्धः द्वितीयानां परम्परेति व्यवस्था कृता तान्त्रिकैः, तद्वत्प्रकृतेऽपि व्यवस्था क्रियते । ननु "तत्र नान्यः पन्था अयनाय विद्यते" इत्यादिप्रमाणाऽनुगृहीतया मिथ्याभूतस्य बन्धस्य निवृत्तिर्ज्ञानातिरिक्तेन न सम्भवति ।

न हि मिथ्यासर्प-निवृत्तिर्गरुडोपासनादिकमपेक्षते इति युक्त्या बलवत्तरविनिगमकभूतया तन्निर्णयो भवतीति प्रकृते न तादृश-विनिगमकमस्तीति चेन्न तयैव युक्त्या मन्त्रादेर्मोक्षप्रदत्वास-म्भवात् ज्ञानस्यैव तत्सम्भवात्, तेषां मोक्षे परम्परा-सम्बन्ध इति भवतैव वक्तव्यत्वात्, न च तथापि रामकृष्णादिमन्त्राणां शिवशक्त्यादिमन्त्राणामपि समानमेव मोक्षदातृत्वमिति तत्रैवे-दानीं विचारप्रवृत्तेर्न भवदुक्तपरम्परा-सिद्धिरिति वाच्यम्,

"सत्त्वात् सञ्जायते ज्ञानं सत्त्वस्यैष प्रवर्तकः।"

"श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः॥"

इत्यादिभिः प्रमाणैः सात्त्विकदेवताया विष्णोरेव सत्वाभिवृद्धि-ज्ञानादिप्रणाल्या श्रेयःप्रापकत्वस्याभिहिततया तदन्यदेवतानां तद्द्वारैव तस्यावश्यकतयोभयत्र परम्परायां तत्तन्मन्त्राधिष्ठातृ-देवतातिरिक्तदेवतां प्रमाद-घटनाघटनाभ्यां वैलक्षण्यस्यापरि-हार्य्यत्वात् तत्तन्मन्त्राधिष्ठातृदेवतोपासनस्य चित्तशुद्धिद्वारा-ऽध्यासकारणीभूतसंस्कारादिर्निवर्तकत्वं तन्निवृत्तौ च कारण-नाशादेव बन्धनिवृत्तिरूपो मोक्ष इति तत्त्वमस्यादिवाक्यजन्या-परोक्षज्ञानात्मककारणेन बन्धस्य निवृत्तिरिति मोक्षवादा-द्विलक्षणोऽश्रुतपूर्वोऽयं मोक्षवादः इति।

प्रश्न० पत्नीग्रहणरहितस्य दीक्षादानेऽधिकारोऽस्ति न वेति।

दुर्ज० इत्यष्टमवाक्यम्, तत्रोत्तरम्। अस्त्येवेति। तथा हि यज्ञादेः श्रौतस्य हि कर्मणो यजमानपत्नीव्यासक्तकर्तृत्वस्य पत्नीमन्तराऽनुष्ठानासम्भवः आज्यावेक्षणाद्यङ्गविशेषे पत्न्यपेक्षायाः

सत्त्वात् । न हि तथा स्मार्तस्य स्नानादेः कर्मणस्तदपेक्षा तस्य विधुरादिनाप्यनुष्ठीयमानतयाऽव्यासक्तकर्तृत्वकत्वात् । एवमेव मन्त्रदीक्षादिस्मार्तकर्मणामपि कर्तृत्वं न व्यासक्तम्, तद्विनियोगशास्त्रे पत्नीसम्बन्धापेक्षायाः कुत्राप्यप्रतिपत्तेः । एवमेव हि मध्वाचार्य्यप्रभृतिभिरपि दीक्षा कार्य्यते ।

पत्नीसापेक्षाऽनुष्ठान-यज्ञादिश्रौतकर्म-वैलक्षण्यमुपपादयितुं यज्ञादिकर्मणां पत्न्यपेक्षतामाह,—यज्ञादेरित्यादिना । व्यासक्तमिति यजमानपत्न्योरेकमेव कर्तृत्वं तत्रैकतराभावे तदनुष्ठानं न सम्भवतीति भावः । अथ स्मार्तस्य कर्मणस्तद्वैलक्षण्यमाह,—तथा स्मार्तस्येत्यादिना विधुरादिनेति मृतदारादिनेत्यर्थः । तद्विनियोगशास्त्रे मन्त्रदीक्षाक्रमप्रतिपादकशास्त्रे पाञ्चरात्रादौ एवमेव हि मध्वाचार्य्यप्रभृतिभिरिति तत्सम्प्रदाये सन्न्यासिभिरेव दीक्षाप्रदानादिति भावः ।

सञ्ज० इति रामानुजीयाः, पत्नीग्रहणरहितस्य दीक्षादानेऽधिकारोऽस्ति न वेत्यस्मत्प्रश्नस्यायमभिप्रायः । तन्त्रसारादिग्रन्थेषु गृहस्थानां दीक्षाग्रहणविधिप्रकरणे पुत्रवद्भ्यो ब्राह्मणेभ्यः सकाशात् दीक्षाग्राह्येत्यर्थकवाक्यानामुक्तत्वात् भवत्सम्प्रदायिनस्तु अनूढ़भार्य्या अपि धनादिलोभेन गृहस्थेभ्यः शास्त्रतत्त्वानभिज्ञेभ्यो बहुशो दीक्षाप्रदानात् तान् नरके पातयन्तीति महदन्याय्यं भवतां सम्प्रदाये श्रूयते, तन्नोचितम् अगृहीतपत्नीकानां तु पुत्रवत्त्वासम्भवेनानधिकारित्वेन शास्त्राज्ञोल्लङ्घने तद्यातनार्हतासम्भवात् । यत्तु तद्विनियोगशास्त्रे पत्नीसम्बन्धा-

पेक्षायाः कुत्राप्यप्रतिपत्त्यात्मकहेतुदार्ढ्यायैवमेवमध्वाचार्य्यैत्यादिकमुक्तं तदप्यसङ्गतम् । मध्वानां नियमेनानूढभार्य्यत्वे प्रमाणाभावादतएव जयनगरादिषूढभार्य्या अपि माध्वा उपलभ्यन्ते इति अस्मत्प्रश्नस्तदवस्थ एवेत्यलम् इति तत्खण्डनमिति ।

व्या० यत्तु अयमभिप्राय इत्यारभ्य तन्त्रसारात् इत्युक्तं तत् बहुतरग्रन्थावलोकनविलसितम् । तन्त्रसारादिषु पुत्रवद्भ्यो ब्राह्मणेभ्यः सकाशाद्दीक्षा ग्राह्येति वचनोक्तिः किं श्रुतिसिद्धं रैक्वादिशान्यग्रेसरकृतं ज्ञानश्रुत्यादिकं प्रतिज्ञानोपदेशं विरुणद्धि । किं चेदानीमपि ह्यस्मत्सम्प्रदायि-व्यतिरिक्तैः काश्यादिमहाक्षेत्रनिवासिभिः शिष्टत्वेन प्रसिद्धैः बहुशास्त्रतत्त्ववेदिभिः सन्न्यासिभिः शैवादिदीक्षा दीयते इति प्रत्यक्षमवलोक्यते तन्त्रसारादिवाक्यस्य का गतिः ? सोभाभ्यां विद्यारण्यीया एवं याज्ञवल्क्यादिभिरपि पुत्रवत्तयाऽप्रसिद्धैर्बहवः शिष्याः कृताः । भवत्सम्प्रदायिभिरिति द्वेषपिशाचाविष्टप्रलापः अन्यसम्प्रदायिष्वपि तद्दर्शनात् धनादिलोभेनेत्यादिकमसत् । न हि कश्चित् ब्राह्मणः मद्यं पिबति चेत् सर्वस्य ब्राह्मणकुलस्य दूषणम् । अस्मदाचार्य्यैः स्वग्रन्थेषु धनादिलोभेनोपदेशो न कर्तव्य इति बहुषु स्थलेषु सम्यगभिहितं स्वाधिकारानुगुणं शिष्येणोपपादितस्वादाने न दोषगन्धोऽपि । अतएव रैक्वे नाजहारेमाः शूद्रानेनैव मुखेनापाययिष्यथ इति ज्ञानश्रुतिं शिष्यं प्रत्युक्तम् । एवम् आचार्य्येणोपदेशे कृते ज्ञानं भवतीति तत्पूर्वशास्त्रतत्त्वाज्ञानं च न दोषाय । किं च

"शास्त्रज्ञानं बहुक्लेशं बुद्धेश्चलनकारणम् ।
उपदेशात् हरिं बुध्वा विरमेत् सर्वकर्मसु ॥"

इति प्रकारेण मन्दाधिकारिणां शास्त्रज्ञानाभावेऽपि उपदेशाधीनज्ञानमात्रात् तदभिमतसिद्धेरभिहिततया शास्त्रज्ञानाभावस्य नरकपतनहेतुत्वं नास्ति । महदन्याय्यमिति अन्याय्यत्वमापेक्षिकम् । वारविलासिन्यपेक्षया पातिव्रत्यं लुब्धापेक्षया वदान्यभाव इत्यादिकमन्याय्यम् अगृहीत-पत्नीकानामित्यादिकमपि तुच्छम् । जातपुत्रः कृष्णकेश इत्यादिवत् गृहीतपत्नीकत्वं दीक्षादातुरावश्यकमिति कुत्राप्यनभिधानात् प्रागुक्तशिष्टाग्रगण्यशाक्तनाद्यतन-महाजनसञ्चरण-क्षुण्णघण्टापथ-सञ्चारिणामस्माकं शास्त्रोल्लङ्घनाभावेन यातनार्हतासम्भवाभावाच्च प्रत्युत तदवस्थावधृतेस्तदवस्थावधृतेरित्युक्तन्यायेन भवतामेव निरयपतनार्हत्वात् । यत्तु यत्त्वित्यादि उपलभ्यन्त इत्यन्तं तदतितुच्छम् । माध्वसम्प्रदाये सन्न्यासिभिरेव दीक्षा कार्य्यते इति तदाचारो भवदभिप्रायविरोधी निदर्शितः, न तु माध्वैर्विवाहो न क्रियत इति तच्चोक्तम् अस्मत्प्रश्नस्तदवस्थ एवेति तु सत्यं भवत्प्रश्नो पात्रविनिर्मितघट्टकनिषत्यौ नास्मदुत्तरेण निवर्तनीयः इति ।

प्रश्न० भवतामत्यावश्यको धर्मः कः ?

दुर्ज० इति पञ्चमः प्रधानः प्रश्नः, तत्रेदमुत्तरम् । अस्माकमावश्यकः तत्तदधिकारिणां वर्णाश्रमधर्मः प्रत्यवायपरिहारार्थः परमप्रयोजनाधिकारार्थः वैष्णवधर्मशास्त्रप्रतिपादितः संस्कारविशेषमारभ्य सिद्धोपायवरणपूर्वापरभाविनो धर्माश्च ।

यत्र यत्र धर्मेऽस्मत्सम्प्रदायिनां मध्ये यस्य यस्याधिकारो नास्ति, तस्य स धर्मो नावश्यक इति।

टी० प्रत्यवायपरिहारार्थं इति सन्ध्यावन्दनादेरकरणे प्रत्यवायोत्पत्त्या प्रत्यवाय-प्रागभावसत्तानियामकसत्ताक इत्यर्थः। परमप्रयोजनाधिकारार्थं इति परमप्रयोजनीभूतमोक्षोपायभक्त्यादिमत एव तत्राधिकारितया कर्मज्ञानाङ्गकभक्त्यादेश्च

"सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।"

इति वचनेन सन्ध्यावन्दनादेः कर्मज्ञानाङ्गकभक्त्यनुष्ठानयोग्यतापादकतया च प्रपत्त्यङ्गानुकूल्यसङ्कल्पान्तर्गततया प्रपत्तिं प्रति साक्षादङ्गतया च सन्ध्यावन्दनादिः परमप्रयोजनाधिकारप्रयोजनक इत्यर्थः। वैष्णवेत्यादिसंस्कारविशेषेत्यनेन तापादिसंस्कारा विवक्षिताः सिद्धोपायवरणपूर्वापरभाविनो धर्मा आनुकूल्य-सङ्कल्पादयः। यत्र यत्रेति अस्मत्सम्प्रदायस्य चातुर्वर्ण्याधिकारकत्वस्य प्रागुक्ततया तेषु यत्र यत्राग्निहोत्रसन्ध्यावन्दनादिषु यस्य यस्य शूद्रादेरधिकारो नास्ति, तस्य स धर्मो नोपदेय इत्यर्थः।

सत्त्व० इति रामानुजीयाः, यत्तु भवतामावश्यको धर्मः क इत्यस्मत्प्रधानपञ्चमप्रश्नोत्तर-प्रवृत्तैस्तत्रोत्तरमित्यारभ्य स धर्मो नावश्यक इत्यन्तकमुक्तं तत्तुच्छम्। ज्ञातप्रत्यवाय-परिहारार्थत्वे स्वप्रत्यवायमजानतां भवत्सम्प्रदायिनां तत्राप्रवृत्त्यापत्त्या चावश्यकत्वस्य तत्र वक्तुमशक्यत्वात्। अज्ञातप्रत्यवाय-परिहारार्थत्वेऽभावप्रमितेः प्रतियोगि-प्रमितिमन्तरेणाऽसम्भवात्

प्रत्यवाय-परिहारविषयकेष्टसाधनताज्ञानाभावात्, तत्र तथैवाप्रवृत्त्यापत्तौ उक्तदोषस्य तदवस्थत्वात् प्रत्यवाय-परिहारेणोपक्षीणस्य परमप्रयोजनाधिकारसाधकत्वस्य वक्तुमशक्यत्वाच्च न चानन्दावाप्त्यात्मकपरमप्रयोजन-प्रतिबन्धकीभूतविद्याविध्वंसकप्रत्यवायपरिहारात् परमप्रयोजनाधिकारार्थात् सेत्स्यतीति वाच्यम्, परमप्रयोजनाधिकारार्थं इत्यस्य वैयर्थ्यापत्तेः। किं च निरुक्तधर्मस्य विशेषतया स्वबोधकशब्देनानुपादानात् अस्मत्प्रश्नस्य मूलभूतजिज्ञासा-निवर्तकस्यैतद्वाक्यकदम्बस्य वक्तुमशक्यतयोत्तरत्वमेतस्याशक्यमेवेत्यलम् इति तत्खण्डनम् इति ।

व्या० अत्र यत्तु भवतामित्यादिना इत्यन्तकमुक्तमित्यन्तेन किञ्चिदनूद्य तत्तुच्छमिति प्रतिज्ञाय तदुपपादनार्थं ज्ञात-प्रत्यवाय-परिहारार्थत्व इत्यादिना विकल्प्य दूषणमिवोक्तम्, तच्छास्त्रमर्य्यादाज्ञानं प्रकटयति तदुक्तः सन्ध्यावन्दनादीनामावश्यकधर्मत्वेन विवक्षितानां प्रत्यवाय-परिहारार्थत्वं हि तान्त्रिकाभिमतम्। तेषां यदि भवदुक्तरीत्या प्रत्यवाय-परिहारार्थत्वं न स्यात्, तदा केनापि तदनुष्ठानं न स्यात्। किं च सन्ध्यावन्दनाद्यननुष्ठाने प्रत्यवायो भवेत्, तदनुत्पादार्थं सन्ध्यावन्दनं शिष्टैरनुष्ठीयते तदननुष्ठाने च जाते प्रत्यवाये तन्निवृत्तिः प्रतिपदविहितप्रायश्चित्तेनैव भवेत्, तादृशप्रत्यवायस्य ज्ञानं

"सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।"

इति शास्त्राद्भवति। यदि वयमुत्पन्न-प्रत्यवायपरिहारार्थमिति ब्रूमस्तदायं विकल्पः सम्भवति। ये तु बालाः शास्त्रं न विजा-

र्नन्ति, ते गुर्वादिप्रेरितास्तमनुतिष्ठन्ति भवन्तोऽपि कथं सन्ध्या-
वन्दनादिकमनुतिष्ठन्ति भवत्स्वपि भवदुक्तविकल्पस्य जागरूक-
त्वात्। किं च स्वप्रत्यवायमजानतामपि "कूष्माण्डैर्जुहुयाद्यो पूत
इव मन्येत" इत्यादिविहित-प्रायश्चित्त इव प्रवृत्तिः सम्भवत्येव।
अतः सन्ध्यावन्दनादावप्रवृत्तिः कथमपि नोपपद्यते अज्ञातप्रत्य-
वायपरिहारार्थत्व इत्यादिना यदुक्तं तदप्यसङ्गतम् अभावप्रमि-
तित्वं हि आर्यसमाजग्रस्तप्रमितित्वघटितं न कस्यचित् कार्य्यता-
वच्छेदकं तत्प्रतीतिं प्रति तु प्रतियोगिज्ञानं कारणं तच्च शास्त्र-
मधीतवतां तेन जायत एवातस्तत्परिहाररूपेष्टसाधनताज्ञान-
मप्यविघ्नं संपद्यत एवेति कथं तत्राप्रवृत्त्यापत्तिरापादकाभावात्
प्रत्यवायपरिहारेणोपक्षीणस्येत्यादिकमप्यसत् प्रत्यवायपरिहारे-
णैव परमप्रयोजनाधिकारार्थत्वस्योक्तत्वात् सन्ध्यावन्दनादिनि-
त्यानुष्ठानाभावे कर्मज्ञानाङ्गकभक्त्यादिमोक्षोपायासम्भवात् पर-
मप्रयोजनासम्भवात् एतज्ज्ञापनार्थमेव प्रत्यवायपरिहारार्थपरम-
प्रयोजनाधिकारार्थस्येत्युक्तम्, न चेत्याद्यनभिमताकलनं च स्वीय-
पाण्डित्यज्ञापनाय भवद्भिः कृतमिति प्रतिभाति। किं चेत्यादि-
कमपि मूकबधिरसम्भाषणसदृशम् अस्माकमावश्यको वर्णाश्रम-
धर्मः संस्कारविशेषमारभ्य सिद्धोपायवरणपूर्वापरभाविनो धर्म-
श्चेति स्पष्टोक्तेरपि भवद्भिरश्रुतत्वात्। न च ते धर्मा अस्माभि-
र्नावधृता इति वाच्यम्, तर्हि मन्वादिधर्मशास्त्रपारं गतान् प्रप-
न्नादिधर्मशास्त्रज्ञांश्चानुसृत्य तज्ज्ञानस्य भवद्भिः सम्पादनीय-
त्वात्। किं चास्मदादिभिस्तन्निरूपणे सम्यक् कृतेऽपि यदि भवत्सु

कश्चित् ब्रूयात् संस्कृतभाषयोक्तं नाहं जानामीति तदा किं कर्त्तव्यमस्माभिस्तद्भवन्त एव वदन्तु । अस्मत्प्रश्नस्य मूलभूतेत्यादिकं न शोभनं, तादृशं प्रश्नं प्रति व्यवहर्तव्यज्ञानविधया मूलभूताऽस्मदावश्यकधर्मजिज्ञासा या सा यदि स्वविषयसिद्धावपि न निवर्त्तते तदा तन्निवृत्तये जपहोमादिकर्माभिचारिकं कर्म कुर्वन्तु भवन्त इति ।

दुर्ज० एतत्प्रश्नावलम्बीन्यष्टौ वाक्यानि तत्रेदमादिमम् ।

प्रश्न० हरिध्यानादिकमावश्यकं यद्युच्यते, तदा सन्ध्यागायत्रीमध्ये भवतामनावश्यकत्वमिति वक्तव्यम् । तर्हि वर्णाश्रमगणना भवन्मते सम्मता न वेति ।

दुर्ज० अहो ! वाक्यरचनाचातुर्य्यमर्थज्ञानवैदग्ध्यं च ! किं सन्ध्यागायत्र्याद्यनावश्यकतामात्रेण वर्णाश्रमगणनायामसम्मतत्वम् । निषेधकोटावेवानावश्यकत्वांशस्योपपादकताप्रतीतेः गायत्र्याद्यावश्यकताशून्यानां परमहंसपदाभिलपनीयानामपि केषाञ्चित् कथञ्चित् शास्त्रपरिशीलनक्षमाणां वर्णाश्रमगणनासम्मतिदर्शनादिति । अत्रेदमुत्तरमभिधीयते हरिध्यानादिकमावश्यकमित्युक्तौ सन्ध्यागायत्र्यादीनामनावश्यकता कथं वक्तव्या । न हि मातृसेवा पुत्रस्यावश्यकेत्युक्त्या पितृवधो वक्तव्यो भवति, हरिध्यानावश्यकत्वे हि सन्ध्यावन्दनानावश्यताव्याप्तिर्नास्ति । हरिध्यान-सन्ध्यावन्दनगायत्र्यनुष्ठानयोः परस्परविरोधे ह्येकस्यावश्यकत्वमन्यस्यानावश्यकत्वे पर्य्यवस्येत् भगवज्ज्ञानं हि,—

"अविद्यया मृत्युं तीर्त्वा विद्यया मृतमश्नुते। यज्ञेन दानेन तपसा नाशकेन इयाज सोऽपि सुबहून् सर्वापेक्षा च यज्ञादि-श्रुतेरश्ववत आश्रमकर्मापि" इति श्रुतिस्मृतिसूत्रादिभिः स्वोत्पत्तिप्रचयार्थं सर्ववर्णाश्रमकर्माण्यपेक्षत इति बहुतरं प्रतिपाद्यते इति सम्मतिरस्त्येवेति।

टी० अहो! इत्यादि तदा सन्ध्यागायत्रीमध्येऽभवतामनावश्यकत्वमिति वाक्यपरिपाटीमभिप्रेत्य वाक्यरचनाचातुर्य्यमित्युक्तम्। हरिध्यानावश्यकत्वे कर्मणां तदङ्गत्वस्वीकर्तॄणां तेषामावश्यकत्वमेवायाति विनाङ्गाऽनुष्ठानमङ्गिस्वरूपनिष्पत्त्यसम्भवात्। अर्थस्थितेरेतादृशत्वेऽपि हरिध्यानावश्यकत्वे सन्ध्यागायत्र्याद्यनावश्यकत्वाभिधानादर्थज्ञानवैदग्ध्यमुक्तम्। किं चान्यदपि वैदग्ध्यमित्याह,—किं सन्ध्यागायत्र्येत्यादिना। अनावश्यकतामात्रेणेत्यत्र मात्रशब्देन वर्णाश्रमगणनासम्मतत्वज्ञापकहेत्वन्तरं व्यावर्त्त्यते। यथा पुत्रोत्पादावश्यकत्वे दारसंग्रहस्य सम्मतत्वं तदभावे तदभावस्तथा सन्ध्यावन्दनादेरनावश्यकत्वे वर्णाश्रमगणनाया असम्मतत्वमिति भ्रान्तिमूलत्वाद् विकल्पस्यानावश्यकत्वमसम्मतत्वस्योपपादकमित्यभिप्रायेणाह,—निषेधकोटावेवेत्यादि। तत्र व्यभिचारमाह गायत्र्याद्यावश्यकताशून्यानामिति कथञ्चिदिति पाण्डित्यादिप्रशस्त्यर्थमपीत्यर्थः। मिथः प्रयोज्यप्रयोजकभावानापन्नयोरपि तदभिधानानौचित्ये दृष्टान्तमाह,—न हि मातृसेवेत्यादिना। इदमुपलक्षणम् मातृसेवावश्यकेत्युक्तौ "मातृदेवो भव पितृदेवो भव" इति साहचर्य्यवशात् तद्वत् पितृ-

सेवाद्यावश्यकेति निरूपका आनीयुः एवं च हरिध्यानमावश्यकमित्युक्तौ

"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।
उभाभ्यामेव पक्षाभ्यामाकाशे पक्षिणां गतिः॥
तथैव ज्ञानकर्मभ्यां प्राप्यते भगवान् हरिः।"

इत्यादिशास्त्रपरिशीलनवतां सन्ध्यागायत्र्यादीनामप्यावश्यकत्वमेव ज्ञायेतेति। यदि यत्र हरिध्यानं, तत्र न सन्ध्यावन्दनादिकमिति व्याप्तिर्दृश्येत तदा भवत्समीहितं सिध्येत् तदपि नास्तीत्याह, हरिध्यानाद्यावश्यकत्वे हीति तदेवोपपादयति, हरिध्यानेत्यादिनाऽन्यस्यानावश्यकत्वे पर्य्यवस्येदिति अनावश्यकत्वं ज्ञापयेदित्यर्थः। हरिध्यानावश्यकत्वं सन्ध्यागायत्र्याद्यावश्यकत्व एव पर्य्यवस्येदिति तदभिमतवैपरीत्यमाह,—भगवज्ज्ञानं हीत्यादिना। अविद्ययेत्यादि अत्राविद्याशब्देन विद्येतरत् कर्मोच्यते,—

"अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते।
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा॥"

इति विष्णुपुराणे तथाभिधानात्, तथा च भाष्यम् "अविद्यया कर्मणा मृत्युं ज्ञानोत्पत्तिप्रतिबन्धकं प्राचीनं कर्म तीर्त्वापोह्य विद्यया ज्ञानेनामृतं ब्रह्माश्नुते प्राप्नोतीत्यर्थः" इति यज्ञेनेत्यादि "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" इति पूर्ववाक्यम् असिना जिघांसते अश्वेन जिगमिषति इत्यादाविवासश्वयोर्हननगमने, प्रतियज्ञादीनां ज्ञानसाधनत्वं प्रतीयते।

इयाज सोऽपि————————इत्यादि।

"ब्रह्मविद्यामधिष्ठायोद्दिश्यज्ञानव्यपाश्रयः।"

शास्त्रजन्यज्ञानवान् सुबहून् यज्ञान् इयाजेति यज्ञादिकर्मणो ब्रह्मविद्यापदवाच्य-भक्तिं प्रति साधनत्वं ज्ञायते। सर्वापेक्षेत्यादिद्वयं सूत्रं सर्वापेक्षाविद्यावर्णाश्रमविहित-यज्ञादिसर्वकर्मापेक्षते, यथा गमनसाधनीभूतोऽश्वः कुथादिसर्वोपकरणमपेक्षते इति तदर्थः। संग्रहेण तदर्थमाह,—स्वोत्पत्तिप्रचयार्थमिति। उत्पत्तिश्च प्रचय उत्तरोत्तराभिवृद्धिश्चार्थौ यथा तथेत्यर्थः। बहुतरं प्रतिपाद्यत इति तथा च हरिध्यानस्यावश्यकत्वे सन्ध्यागायत्र्याद्यनावश्यकत्वं कथमपि न सङ्गच्छत इति भावः।

सञ्ज० इति रामानुजीयाः, एतत्प्रधानप्रश्नप्रतिपत्त्यर्थानि अष्टाववान्तरप्रश्नवाक्यानि उपन्यस्तानि। तत्र प्रथमं हरिध्यानादिकमित्यारभ्य भवत्सम्मता न वेत्यन्तकं प्रश्नवाक्यम्। तस्यायमभिप्रायो यदि स्वगोष्ठीसङ्केतेन हरिध्यानादीनामावश्यकत्वमित्युच्यते, तदा सन्ध्यादीनां भवदाचार्य्यैः स्वकर्त्तृकोपासनकर्म्मभूतत्वेनानङ्गीकृतानामनावश्यकत्वं भवतामप्यावश्यकम्। एवं सति वर्णाश्रमाद्युचितश्रौतस्मार्तसन्ध्योपासनादिकर्मविहीनानां भवतां स्वान्तर्भावेण वर्णाश्रमगणना सम्मता न वा? यदि न सम्मता, तर्हि कथमुपपाद्या?

"नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
सशूद्रवद्बहिष्कार्य्यः सर्वस्माद् द्विजकर्मणः॥"

इति स्मृत्या निरुक्तकर्मविहीनस्य शूद्रत्वातिदेशात्। यदि सम्मता, तर्हि प्रत्यवाय-परिहारार्थत्वेन वर्णाश्रम-धर्मस्यावश्यकत्वकथनं

त्वदीयमसङ्गतमेव । न हि श्रुतिस्मृतिप्रोदितवर्णाश्रमोचिता-
साधारणधर्मविहीन-वेदविरुद्धाचार-कलुषितमानसं निरुक्तधर्म-
मात्रेण कश्चिदपि प्राज्ञो गणयतीति । एतेनैतत्प्रश्नोत्तरे प्रवृत्तै-
र्दग्धाङ्गैर्यदुक्तमहो वाक्यरचनेत्यारभ्य वर्णाश्रमगणनासम्मति-
दर्शनादित्यन्तकं तदपि अस्मत्प्रश्नस्य निरुक्ताभिप्रायकत्वे एवं-
विधकथनस्यानवसरदोषग्रस्तत्वात् । यच्चापि तत्रेदमुत्तरमित्या-
रभ्य पर्य्यवस्येदित्यन्तकमुक्तम् तदपि परास्तम् । स्वपूर्वाचार्य्य-
कृतसन्ध्यावन्दनाद्यनङ्गीकार-पूर्वक-हरिध्यानाद्यङ्गीकारात्मक-
मर्य्यादापरिपालनाय सन्ध्यावन्दनहरिस्मरणयोः परस्परविरो-
धस्य स्वीयैः भवतामवश्यं वक्तव्यतया विरुद्धयोरेकस्यावश्यकत्व-
उक्तेऽपरस्यानावश्यकताया बालैरपि सुज्ञेयत्वात् । यच्चापि
भगवद्ध्यानं हीत्यारभ्य सम्मतिरस्त्येवेत्यन्तकमुक्तं तदप्यसङ्ग-
तम् । तत्तत्-श्रुतिस्मृति-प्रमाणोपगृहीत हरिध्यानादिसम्पा-
दकताकवर्णाश्रमधर्मसन्ध्योपासनादीनां भवादृशैः परित्यक्ततया
तत्सम्पाद्य-हरिध्यानादीनां स्वीयैः कथमपि वक्तुमशक्यतया
भवतां सर्वेषां हरिध्यानादितोऽपि पातित्यापत्त्यैतत्कथनस्य प्रत्यु-
तास्मत्प्रश्नपोषकतया एतत्कथनस्य भवतामनुपयोगात् यथा-
र्थाभ्युपगमात्मकसम्मतिविषयार्थक-शब्दस्यास्मत्प्रश्नघटकतयाऽन्य-
स्यासम्भवाच्चेत्यलमतिविस्तरेणेति तत्खण्डनमिति ।

व्या० अथेदानीं शेषं कोपेन पूरयेदिति शास्त्रार्थमनुरुध्ये-
तत्प्रधान-प्रश्नप्रतिपत्त्यार्थानीत्यारभ्य तत्खण्डनमित्यलमित्यन्तं
वाक्यैः शकार-वाक्यसदृशैः परस्परासंबद्धप्रलापैर्हास्यरसैक-

निदानैः सज्जनमनांस्यनुरञ्जयन्ति भवन्तः। स्थाने खलु "येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्।" तथा हि भवतामावश्यको धर्मः कः? इति प्रधानप्रश्नार्थप्रतिपत्तिः कथमेतत्प्रश्नवाक्यस्य प्रयोजनं भवति, अस्यायमभिप्राय इति शङ्कारवाक्यम्। शास्त्रसङ्केत एव हि प्रमाणोपन्यासपूर्वकमुक्तः स च प्रामाणिकानां स्वगोष्ठीसङ्केत एव तद्गोष्ठ्यामशास्त्रीयार्थस्य प्रस्तावासम्भवात् भवदाचार्य्यैरित्यादिकं न सम्भवदुक्तिकम्। "यां देवतामुपास्ते मनो ब्रह्मेत्युपासीत" इत्यादौ प्रयुक्तोपास्तिशब्दार्थको यद्ययमुपासनाशब्दस्तदा तादृशोपासनाविषयत्वं न कश्चित् सन्ध्यावन्दनादीनामङ्गीकरोति। यदि 'सन्ध्यामुपासते ये तु' इत्याद्युक्तोपास्तिशब्दार्थस्तदा श्रद्धापूर्वकाऽनुष्ठानरूपा तादृशोपासनाऽस्मत्सम्प्रदायिभिरवश्याऽनुष्ठेयतयाऽस्मदाचार्य्यैः स्वग्रन्थेष्वसकृत्प्रतिपादिता क्रियते च। भवादृशानां गोष्ठीमनारूढैरस्मत्सम्प्रदायिभिः अतो न तेषामनावश्यकत्वमावश्यकमस्माकम्। अतएव एवं सतीत्यादिकमपि नरविषाणकार्मुके कूर्मरोमज्यारोपणम् अवश्यानुष्ठीयमान-सन्ध्योपासनादीनां तद्विहीनत्वोक्तिं कथं सन्तः प्रमाणयन्ति स्वान्तर्भावेणेत्यप्यसङ्गतम्। द्रव्यगणना यथा पृथिव्याद्यन्तर्भावेण भवति, तत्सङ्ख्या पूरकाणामेव तद्गणनान्तर्भावात् न तथा वर्णाश्रम-गणनान्तर्भावोऽस्माकं भवतां वा भवितुमर्हति। यदि न सम्मता तर्हि कथमुपपाद्येत्यसङ्गतम्। गुणगणनायाः स्वान्तर्भावेणासम्मतत्वेऽपि भवद्भिस्तद्गणनोपपाद्यत एव नोपतिष्ठतीत्यादिवचनोपन्यासोऽपि प्रकृताऽनुगुणः यो द्विज-

वेषधारीम द्यपानादिमत्तः श्रौतस्मार्तकर्मविभ्रष्टस्तस्यान्यस्य वा तादृशस्य शूद्रत्वातिदेशकत्वात् तस्य यदि सम्मतेत्यादिकमप्यतितुच्छम् । प्रत्यवायपरिहारार्थत्वेनेत्यादिकं नास्मदीयमात्रकथनं किन्तु सर्वप्रामाणिकानां शास्त्रानुरोधेन सर्वमनुतिष्ठतां कथनं कथमत्र भवतामाक्रोशः तत्रासङ्गतत्वोपपादनार्थं न हीत्यादिना यदुक्तं तत्र मनोज्ञम् श्रुतिस्मृत्यादिप्रोदित-वर्णाश्रमोचितासाधारणधर्मविहीनत्वस्य वेदविरुद्धमद्यपानादिदुराचारकलुषितमानसत्वस्य च सततानुष्ठीयमान-तत्तद्वर्णाश्रमोचित-श्रुतिस्मृत्यादिप्रोदित-सत्कर्मसु सुदूरपरित्यक्तवेदविरुद्धाचारे तदनुष्ठातृष्वदर्शनेन ये तद्भाजस्तान् प्राज्ञा न गणयन्तु नाम का हानिः एतैरित्यादिना वृथाजल्पिभिः परत्रैर्ष्योद्वेषपरीवाददग्धमानसैर्यदुक्तम् तदतिदुष्टम् । यदि वाक्यरचनेत्यत्र भवतामेतादृशो मनसः क्षोभो जातस्तदा वाक्यार्थ-सामञ्जस्यमस्मदुक्तासामञ्जस्य-निराकरणाय वक्तव्यम्, किं क्रोधोक्त्या निरुक्तयुष्मदभिप्रायः खलु शब्दज्ञानेत्यादियोगशास्त्रोक्तविकल्पवृत्त्येकवेद्यः एवंविधकथनस्येत्यादिकं युक्तमेव तस्य प्रामाणिकसभ्यसभाध्यस्य भवदग्रेऽकर्तव्यत्वात् अनवसरे यत्फणितं सुभाषितमपि हासायेति वदन्ति हि नीतिविदः । यच्चापीत्यादिकमपि तुच्छम् अस्मत्पूर्वाचार्य्यैस्तत्तद्वर्णाश्रमोचित-श्रौतस्मार्तकर्माङ्गकहरिध्यानात्मकोपायस्यानुष्ठेयतया तत्र तत्र युक्तिपुरःसरं प्रतिपादितत्वस्यासकृदावेदितस्याश्रवणेन विस्मरणेन वाश्रयप्रतिपत्त्यर्थं वाऽन्यथाप्रतिपन्नत्वात् । किं च स्वाभिप्रेतार्थोपपत्तये

केनचित् कल्पितः कश्चनार्थो न वस्तुस्वभावसिद्धाकारविरोधी भवेत्। न ह्यविरोधेन शास्त्रप्रतिपाद्ययोः प्रत्युतोपजीव्योपजीवकभावेन परस्परापेक्षयोर्वर्णाश्रमधर्महरिध्यानयोरस्माभिरनुष्ठीयमानतयेदानीमप्यत्र भवद्भिरपि परिहृष्टयोरस्मदीयेषु परस्परविरोधः केनचिदप्रमत्तेन वक्तव्यः। द्वेषादिना कथञ्चिद्विरोधारोपेऽपि वास्तवविरोधशून्ययोरेकस्यावश्यकत्वेऽन्यस्यानावश्यकता बालैरेव सुज्ञेयेति। यच्चापीत्यादिनाऽस्येवेत्यन्तेन किञ्चिदनूद्य तदप्यसङ्गतमिति प्रतिज्ञाय तदुपपादकतया तत्तत्-श्रुतिस्मृतीत्यादिकं यदुक्तं तदपि स्तनन्धयभाषितम्। श्रुतिस्मृत्यादिप्रमाणानुसारेणास्माभिरावश्यकतयोक्तस्य हरिध्यानस्याङ्गभूतस्य वर्णाश्रमकर्मणोऽस्माभिः परित्यागः किमस्मदनुष्ठानाभावेनास्मत्पूर्वाचार्य्यग्रन्थेषु परित्याज्यताप्रतिपादनेन वा भवद्भिरूहितः, तदुभयं नास्तीति कथमेतदभिधानं शोभते भवताम्। आरोपनिदानेर्ष्यादिदोषेण चेत् तदन्मात्रवेद्य इति न प्रामाणिकहृदङ्गमः। अतस्तत्प्रतिपाद्यहरिध्यानादीनामस्मदीयेषु भवादृशैर्वक्तुमशक्यत्वेऽपि प्रामाणिकैर्वक्तव्यत्वात्। यदि हरिध्यानादिनाऽस्माकं सर्वेषां पातित्यं स्यात्, तदा स एव मोक्षोऽस्माकमिति न तेन काचिद्धानिः, तत्कथनस्य प्रच्युतानां भवतां प्रश्नस्य पोषकस्य यस्मत्प्रश्नं सार्थकं कुर्वतः प्रमाणप्रतिपन्नमर्थं स्वयमनुष्ठायान्येषामुपदिशतामस्माकं क उपयोगः, किन्तु युष्माकमेवोपयोगस्तेन न हि केनापि स्वोपयोगार्थं शब्दः प्रयुज्यते विस्तरेणेत्यत्र हृद्येत्यादिपूरणमतिशोभनम्।

प्रश्न० सन्ध्यादिविहीनस्याब्राह्मण्यं भवत्सम्मतं न वा ?

द्वर्ज० इति द्वितीयं वाक्यम्, तत्रेदमुत्तरम्। अत्राब्राह्मण्यशब्देन यदि ब्राह्मणत्वाभावो विवक्षितस्तत्प्रतियोगि-ब्राह्मणत्वं च यदि परिणीत-ब्राह्मण्यां परिणेतृ-ब्राह्मणाज्जातत्वं तदा सन्ध्यावन्दनादिशून्यस्य तदभावो न विचारसहः उपनयनात् पूर्वं सन्ध्याहीनस्य शिशोस्तदभावात्। यदि ब्राह्मण्यं संस्कारविशेषो "जन्मना जायते शूद्रः" इत्यादिना द्विजत्वपर्य्यायस्य ब्राह्मणत्वस्योक्तत्वात्, तादृशब्राह्मण्याभावो न सन्ध्यावन्दनाभावप्रयुक्तः, तद्ध्वंसस्य सन्ध्यावन्दनादिमत्यपि संस्कारोत्तरकाल एव जातत्वात् तदत्यन्ताभावो ध्वंसाधिकरणेन वर्त्तत एव विरोधात् प्रागभावस्तूत्पन्नस्य न पुनः सम्भवेति। यदि संस्कारविशेषाधीनस्यादृष्टस्य स्थायिनो ध्वंसो विवक्षितो ब्राह्मण्यपदेन तदा सन्ध्यावन्दनत्यागानन्तरभाविना प्रायश्चित्तेन तादृशत्यागनिमित्तकेन पुनर्ब्राह्मण्यं न स्यात्, ध्वंसस्यानाशतया प्रतियोग्युन्मज्जनासम्भवात् प्रायश्चित्तेन ब्राह्मण्यान्तरमुत्पद्यतइति चेन्न जातकर्म्मादिकमारभ्योपनयनपर्य्यन्त-संस्काररूपस्य तदधीनस्य वा कस्यचित् ब्राह्मण्यस्य सन्ध्यावन्दनादित्यागनिमित्तकप्रायश्चित्तेनोत्पत्त्यसम्भवात्। एवं च सति तत्राब्राह्मण्ये सम्मतत्वासम्मतत्वप्रश्नो बन्ध्यापुत्रस्य दारपरिग्रहसम्मतत्वासम्मतत्वप्रश्नवन्निरूपकाणामुपहास्यः, किन्तु सन्ध्यावन्दनादिकं हि गुरुमते पण्डापूर्वफलकं नैयायिकादीनां प्रत्यवायप्रागभाव-प्रयोजकं प्रयोज्यप्रयोजकभावश्च योगक्षेमसाधारणः स्वरूपसम्बन्धविशेषः

सिद्धान्तिनामुपायान्तरानुष्ठानयोग्यता-सम्पादकम्। "सन्ध्या-हीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्मसु" इति स्मृतेः मतत्रयेऽपि सन्ध्यावन्दनाभावे पण्डापूर्व्वोऽनुत्पत्तिः प्रत्यवायः फलपर्य्यन्तो-पायानुष्ठानविरोधि-प्रत्यवायश्च भवेत्, गुरुमते विहितकाल-सन्ध्यावन्दनाभावसमानाधिकरणसन्ध्यावन्दनस्य पण्डापूर्व्वोत्पा-दकत्वासम्भवात् तदर्थं प्रायश्चित्ताऽनुष्ठानं प्रायश्चित्तविशिष्ट-स्यैव तत्कालशुचिजीविनः सन्ध्यावन्दनस्य पण्डापूर्व्वोत्पादकता-वच्छेदकशक्तिविघटकत्वम्। नैयायिकमते प्रायश्चित्तस्य पूर्व्वो-त्पन्नपापविनाशकत्वम् अनन्तरकालीनसन्ध्यावन्दनस्य प्रत्यवाय-प्रागभावप्रयोजकतासिद्धान्तिमते पूर्व्वोक्तोपायानुष्ठानविरोधि-पापनाशकत्वं चेति मतत्रयेऽपि प्रायश्चित्तोपपत्तिः कथञ्चिद् अब्राह्मणपदप्रतिपाद्यतयोक्तार्थ एव विवक्षितस्तदा सन्ध्यावन्दन-विहीनस्य तादृशमब्राह्मण्यं सम्मतमेवेति।

टी० तत्रोत्तरमित्यादि अत्राब्राह्मणपदस्य वक्ष्यमाणार्थ-विशेषे पर्य्यवसानायार्थान्तरं निरस्यति। अत्राब्राह्मणशब्दे-नेत्यादिना तदभावो न विचारसह इति सन्ध्यावन्दनाऽनु-ष्ठानानर्हतादशायां तदभावेनान्येन वा तादृशब्राह्मण्यां तादृश-ब्राह्मणादुत्पन्नत्वस्य प्रागुक्तस्यापनेतुमशक्यत्वादिति भावः। तदेवोपपादयति, उपनयनादित्यादिना, तदभावात् निरुक्त-ब्राह्मण्याभावाभावात्। यदीत्यादिसंस्कारविशेषो ब्राह्मणमि-त्यत्र प्रमाणमाह,—जन्मनेत्यादिना। सन्ध्यावन्दनाभावे तद-भावोऽपि न विचारसह इत्याह,—तादृशेत्यादिना। संस्का-

रोत्तरकाल एवेति संस्कारस्योपनयनादेः क्रियारूपत्वादिति भावः। उत्पन्नस्य न पुनः सम्भवतीति प्रतियोग्युत्पत्तिकाले नष्टस्य पुनरुन्मज्जनासम्भवादिति भावः। संस्कारस्य क्रियारूपस्य तत्त्वासम्भवे तदधीनचिरकालवृत्त्यदृष्टस्य तत्त्वं सम्भवतीत्याशङ्कां निरस्यति। यदि संस्कारविशेषेत्यादिना ध्वंसस्य नाश्यत्वेऽनिष्टमापादयितुमाह,—प्रतियोग्युन्मज्जनेत्यादि। चेतनेति उपनयनपर्य्यन्तसंस्कारस्य शास्त्रोक्तकालेऽनुष्ठितस्य कालातिक्रमणे प्रायश्चित्तपूर्वकमव्रात्यतादशायामनुष्ठितस्य वा तदधीनस्याप्यदृष्टस्य वाऽल्पेन प्रायश्चित्तेन जननासम्भवादिति भावः। इदमुपलक्षणम् "प्रायः पापं समुद्दिष्टं चित्तं तच्छान्तिरुच्यते" इत्यादिनिरुक्त्या प्रायश्चित्त-शब्दप्रतिपाद्यतावच्छेदकपापनाशकत्वेन प्रसिद्धस्य कर्मणः ब्राह्मण्योत्पादकत्वासम्भव इत्यपि बोध्यम्। न तु तर्हि सन्ध्यावन्दनादीनामननुष्ठाने को दोषस्तस्मिन् प्रायश्चित्तविधानं वा किमर्थमित्याशङ्कायामाह, किं त्वित्यादिप्रागभावस्यानादेः प्रयोज्यत्वासम्भवमाशङ्क्याह, प्रयोज्यप्रयोजकभावस्येत्यादिसन्ध्याहीन इत्यादि। इदं च "नोपतिष्ठति यः पूर्वाम्" इत्यादेरुपलक्षणम्। पण्डापूर्वोत्पादकतावच्छेदकशक्तिविघटकत्वं तादृशशब्दभावः।

सन्ध्या० इति रामानुजीयाः, सन्ध्यावन्दनादिविहीनस्या ब्राह्मण्यं भवत्सम्मतं न वेति? अस्मद्-द्वितीयप्रश्नवाक्यस्यायमभिप्रायः। सन्ध्याविहीनपदस्वारस्येनोपनयनादिसंस्कारसंस्कृतपुरुषीय-जीवनाधिकरणीभूत-यावत्काल-व्यापक-श्रुतिस्मृत्युदित-

सन्ध्योपासनादिकर्तृत्वस्थित्यधीन-स्थितिकोपनयनादिसंस्कार-जन्यादृष्टविशेषात्मकब्राह्मण्यप्रतियोगिताको भावः सन्ध्यावन्दनादिविहीन-पुरुषवृत्तित्वेन भवत्सम्मत-याथार्थ्याभ्युपगमविषयो न वा ? यद्याद्यपक्षस्तदा भवत्सम्प्रदायिनां सन्ध्योपासनादिकर्मविहीनानां ब्राह्मणत्वेन स्वं मन्यमानानामब्राह्मण्यापत्त्या भवतां दीक्षादानानधिकारत्वापत्तौ प्रमितप्रमाणव्यतिरेकेण निवारयितुमशक्यायां तदवस्थायां तत्साधनार्थं पत्नीरहितस्यापि दीक्षादानाधिकारित्वसाधनप्रयासस्य भवतां वैफल्यापत्तिः । यद्यन्त्यस्तदा "नोपतिष्ठति यः पूर्वाम्" "अहरहः सन्ध्यामुपासीत" इत्यादिश्रुतिस्मृत्युल्लङ्घनप्रयुक्तप्रत्यवायित्वापत्तिर्भवतामनिवार्य्यैव स्यात् । ब्रह्मणापीति, एतेनात्र ब्राह्मण्यशब्देनेत्यारभ्य तदभावादित्यन्तकं यदुक्तमङ्कितैरस्मत्प्रश्नोट्टङ्कनार्थं तत्परास्तम्, तस्य सन्ध्योपासनाद्यव्याप्यत्वेनास्मद्विप्रतिपत्त्यविषयत्वस्य सन्ध्याविहीनपदस्वारस्येन बालैरपि सुज्ञेयतया तद्विषयकसम्भावनाया अपि स्वतो मौढ्यसूचकत्वात् । यच्चापि यदि ब्राह्मण्यं संस्कारविशेष इत्यारभ्य न पुनः सम्भव इत्यन्तकमुक्तं तदप्यसङ्गतम् । तस्यापि सन्ध्योपासनाद्यव्याप्यत्वेनास्मद्विप्रतिपत्त्यविषयत्वात् इह घटप्रागभावोऽस्तीत्याकारिकाया नियमतः सर्व्वथैव वा प्रतीतेः सकल-जनसाधारण्येनाभावेन प्रागभावस्य शिरोमणिकारैः खण्डितत्वाच्च । अत्यन्ताभावध्वंसयोः कुत्रचित् निरवच्छिन्नसावच्छिन्नप्रतियोगिताकत्वेन परस्परविरोधेऽपि प्रकृते तयोर्विरोधे प्रमाणाभावाच्च । यदाऽब्राह्मण्यपदेन ब्राह्मण्यध्वंस एव गृह्यते । न

च सन्ध्यावन्दनत्यागप्रयुक्त-प्रत्यवायपरिहारार्थेन तदनन्तरकृत-प्रायश्चित्तेन पुनर्ब्राह्मण्यं न स्यात्, ध्वंसस्याविनाशित्वात् प्रतियोग्युन्मज्जनासम्भवादिति वाच्यम्, ध्वंसाविनाशित्वनये एतद्दोषसत्त्वेऽप्यद्वैतसिद्धान्तिनये ध्वंसस्यापि विनाशित्वाङ्गीकारेण प्रतियोग्युन्मज्जनसम्भवात्, न च प्रकृत इव घटध्वंसस्याप्यनित्यत्व घटोन्मज्जनापत्तिरिति वाच्यम्, प्रध्वंसमात्राया अपि प्रध्वस्तभावविरोधित्वात्, न च तथा सति प्रकृतेऽपि निरुक्त ब्राह्मण्यप्रध्वंसमात्राया अपि प्रध्वस्तब्राह्मण्यविरोधित्वे प्रायश्चित्तस्याकिञ्चित्करत्वमिति वाच्यम्। अत्र प्रध्वस्तविरोधिप्रध्वंसमात्रायाः शास्त्रोपदिष्टप्रायश्चित्तेन प्रतिबन्धात्। तेन प्रायश्चित्तेन ब्राह्मण्यान्तरोत्पत्तेरङ्गीकर्तव्यत्वाच्च। न च सन्ध्यावन्दनत्यागजन्य-प्रत्यवायपरिहारनिमित्तक प्रायश्चित्तेन. कथं ब्राह्मण्यमुत्पाद्यमिति वाच्यम्, घटदर्शनायोन्मीलितं चक्षुरिति न्यायेनोत्पादनीयत्वात्, न चान्यदपि तथोत्पाद्यतां तेनेति वाच्यम्, कृतप्रायश्चित्ते ब्राह्मणे निर्विवादतया प्रत्यवायात् पूर्ववत् लोकानां प्रवृत्तिदर्शनेन प्रत्यवायपरिहार-तदतिरिक्त-ब्राह्मण्यमात्रोत्पादकताया एव तेन न्यायेनावगमात्। यद्वाऽब्राह्मण्यपदघटकीभूतब्राह्मण्यपदेन लक्षणया ब्राह्मण्याभिव्यक्तिरुच्यते, विरोधित्वं नञर्थः। तथा च ब्राह्मण्याभिव्यक्तिविरोधि अब्राह्मण्यशब्दार्थः। एवं च सन्ध्यावन्दनत्यागजनित-प्रत्यवायेन ब्राह्मण्यं प्रबलस्वविरोधिधर्मोत्पादनद्वाराऽभिभूयते प्रायश्चित्तेन प्रत्यवायपरीहारपूर्वक-तज्जनित-तत्तद्विरोधिधर्मनिरासद्वारा-

भिव्यज्यते इति । एतेन यदि संस्कारविशेषाधीनेत्यारभ्योपहास्य इत्यन्तं यदङ्कितैरुक्तं, तत्सर्वमभिप्रायापरिज्ञानमूलकत्वाद्धेयं सद्भिः । यच्चापि किन्तु सन्ध्यावन्दनमित्यारभ्याम्नाह्मण्यं सम्मतमेवेत्यन्तमुक्तम् । नैयायिकप्राभाकरस्वमते सन्ध्यावन्दनफलप्रदर्शनार्थं तदप्यस्माकमेवानुकूलं भवतां सन्ध्यादिविहीनत्वेनोपायभूतानुष्ठान-विरोधि-पापाक्रान्तमानसानां भवत्सम्प्रदायस्यानर्थजनकत्वे निश्चिते तत्र त्रैवर्णिकजनाप्रवृत्तावनायासेन सिद्धायामस्मदभिमतसिद्धेरित्यलम् इति तत्खण्डनमिति ।

व्या० द्वितीयप्रश्नवाक्यस्यायमभिप्राय इत्यारभ्य तादृशाभिप्रायाभिलापकं ब्रह्मणापीत्यन्तं यदुक्तं तदयुक्तम् । सन्ध्याविहीनपदस्वारस्येनेति पदमनन्वितार्थकं निश्चीयते इत्यध्याहारेण तद्योजनायां तस्य पदस्य कथमेतादृशाभिप्रायनिश्चायकत्वम् । 'वज्रहस्तो हरिः' इत्यादौ हरिशब्देनान्यार्थविवक्षायां वज्रहस्तत्वविशेषणबोधकपदस्यानन्वितार्थकत्वापत्त्या वज्रहस्तपदम् इन्द्ररूपार्थविशेषे हरिपदस्य तात्पर्य्यमवधारयति, वाक्यघटकपदानां स्वघटितवाक्यघटकसन्दिग्धार्थकपदतात्पर्य्यावधारकत्वं तस्य तदर्थपरत्वमन्तरा स्वार्थस्यान्वयबाधे सत्येव भवति, न चैव प्रकृते सम्भवति भवत्तात्पर्य्यविषयार्थस्यासम्भावितत्वयाऽस्मदभिहितार्थपरत्वेऽपि तत्पदार्थान्वयसम्भवात् तदप्यस्माकमेवानुकूलमिति भवद्भिरपि स्वहस्तितत्वाच्च तादृशतात्पर्य्यनिर्णायकत्वासम्भवात् । ननु पदस्वारस्यमस्तु न वाऽस्मत्तात्पर्य्यं वयमेव जानीम इति चेदस्तु, तत्रापि बहुश उक्तमेव दूषणम् । यत्तूप-

नयनादिसंस्कारसंस्कृतेत्यारभ्य सन्ध्योपासनादिकर्तृत्वस्थित्यधीन-स्थितिकत्वमुक्तमदृष्टविशेषात्मक-ब्राह्मण्यस्य तदनुपपन्नम्। यदा यत्र कर्तृत्वस्थितिस्तदा तत्र तादृशादृष्टसत्त्वमिति व्याप्तिस्वीकारे सुषुप्त्यादिकाले कृत्यात्मककर्तृत्वस्याभावेन ब्राह्मण्यं न स्यात्। अहोरात्रात्मकदिने एकदा कर्तृत्वस्थितिस्तद्दिनमात्रे तादृशादृष्ट-स्थितिप्रयोजिकेत्युक्तौ सन्ध्ययोरेकदा तत्कर्तृत्वसत्त्वेऽन्यदा तद-भावेऽपि तादृशाब्राह्मण्यानुपपत्तिः। तत्रेष्टापत्तौ प्रतिदिनमे-कस्याः सन्ध्याया उपासनेऽपि कृतकृत्यतया सन्ध्यान्तरोपासन-स्यालस्यादिना त्यागापत्तिः "नोपतिष्ठति यः पूर्वाम्" इत्यादि-स्मृतिविरोधश्च। शास्त्रोक्त-सन्ध्यावन्दनार्हकालीन-सन्ध्योपासन-त्यागकालीनसन्ध्योपासनाकर्तृत्वं स्वकाले तादृशादृष्टसत्तामा-पादयतीत्युक्तौ त्यक्तसन्ध्योपासनस्य कृतप्रायश्चित्तस्यापि तच्छा-स्त्रविहिते कालेऽनुष्ठितस्य तस्य कृतिः तत्राधिकरणे तादृ-शादृष्टसत्तां नापादयेत्। एवमन्यान्यपरिष्कारेऽपि दोषोऽनु-सन्धेयः। यद्याद्यः पक्षः इत्यादिकं निवृत्तर्णपत्रान्वेषणम् अस्म-त्सम्प्रदायिनां भक्तिप्रपदनाङ्गसन्ध्योपासनादिनित्यनैमित्तिका-नामवश्यानुष्ठेयत्वस्याऽसकृदुक्तत्वात्। यदि मद्यपायिनोऽपि ब्राह्मणवेषप्रच्छन्नाः स्वं ब्राह्मणत्वेन मन्यन्ते तदा श्रौतस्मार्त-कर्मसु अल्पानुष्ठानवतामस्माकं ब्राह्मणत्वाभिमाने को दोषः? अतो नाब्राह्मण्यापत्तिर्न वा दीक्षादानानधिकारिता। किं च प्रमितप्रमाणव्यतिरेकेणेत्यत्र प्रमितेत्यकिञ्चिदवस्थाव्यावर्तकं प्रमाणं चेत् येन केन प्रमितमेव भवेत् आपत्त्यादिनिवारकत्वे प्रमा-

यस्य प्रमितत्वं न प्रयोजकम्। प्रमाणकार्य्यस्य अयं पुरुषो न वेति संशयादिनिवारणस्याप्रमितेनापि चक्षुषा दर्शनात्। अस्माकं दीक्षादानाधिकारसाधनार्थं पत्नीरहितस्य दीक्षादानाधिकारो न साधितः, किन्तु भवद्भिः पत्नीरहितस्य दीक्षादानाधिकारोऽस्ति न वेति प्रश्नः कृतः, तस्य वस्तुस्थितिमनुरुध्योत्तरमुक्तमस्माभिः। यद्यन्य इत्यादिकमपि न सत्, श्रुतिस्मृत्युल्लङ्घनस्यास्मासु स्वप्नेऽप्यभावात् न निवार्य्या ब्राह्मणापीति युक्तमेव वदन्ति भवन्तः। यन्नास्त्येव, तदज्ञतामनुगुणां सर्वज्ञताया विदुर्व्योमाम्भोजमिदं तया खलु विदन् भ्रान्तोऽयमित्युच्यत इति न्यायेन अस्मास्वविद्यमानं प्रत्यवायं कथमपनुदेदसक्तो ब्रह्मापि। न हि गगनसरोजमुन्मीलयति सहस्रकिरणोऽपि सरोजबन्धुः एतेनेत्यादिमौढ्य-सूचकत्वादित्यन्तम् अनाघ्रात-शास्त्रप्रवृत्तिगन्धानां मौढ्यमात्रविजृम्भितम्। पूर्वं ब्राह्मण्यविचारप्रस्तावे शास्त्रोक्तविधिना परिणीतब्राह्मण्यां तादृशब्राह्मणादुत्पन्नत्वं ब्राह्मणत्वमिति तत्र भवद्भिरुक्ततया तत्सम्भावनाया आवश्यकत्वात्। तादृशार्थव्यावर्तन-पूर्वकमर्थविशेष-तात्पर्य्यावधारकत्वस्यासम्भवस्य सन्ध्याहीनपदेऽनुपदमुक्तत्वात्। उपपत्त्यभावेऽपि उपपादयन्तो जानन्तस्त्वानुपपन्नं बाला एव। यच्चापीत्यादि अस्मद्विप्रतिपत्त्यविषयत्वादित्यन्तं च प्राग्वदेव "जन्मना जायते शूद्रः कर्मणा द्विजः" इति वचनं "धान्येन धनवान्" इत्यादाविवाभेदे तृतीयाङ्गीकारे कर्माभिन्नद्विजत्ववानित्यर्थसम्प्रतिपत्त्या तत्सम्भावनाया अपि सम्भवात्। एवं दीधितिकृता प्रागभावानङ्गीकारेऽपि

तदन्यप्राचीन-नवीनन्यायमतेन प्रागभावनिषेधस्य युक्तत्वमेव। अत्यन्ताभावध्वंसयोरित्यादिना स्वस्याभिनवनैयायिकत्वमाविष्कृतम्। अत्यन्ताभावस्य सर्वत्र सर्वदा किञ्चिदवच्छिन्नप्रतियोगिताकत्वमेव ध्वंसस्य तु प्रतियोग्यधिकरणकालावच्छेदेन निरवच्छिन्नप्रतियोगिताकत्वमन्यकालावच्छेदेनान्यदिति हि तन्मतम्। एवं सति प्रकृतेऽपि अव्याप्यवृत्तिकिञ्चिदवच्छिन्नप्रतियोगिताकध्वंसाधिकरणेऽत्यन्ताभावसत्त्वे प्रमाणाभावात्। मास्तु विरोधो नवीनोक्तरीत्या तथाप्यस्मदुक्तदूषणस्य न परिहारः। संस्कारध्वंसकालावच्छेदेनात्यन्ताभावस्य तत्र सत्त्वेन तस्य सन्ध्यावन्दनाभावप्रयुक्तत्वासम्भवात्। नन्वेतद्दोषपरिहारायैव यद्वेत्यादिपक्षान्तरालम्बनमिति चेन्न तत्पक्षस्यापि दूषितप्रायत्वात्। तथा हि यत्तु न चेत्यादिना किञ्चिदस्मदुक्तमाशङ्क्य ध्वंसेत्यादिना समाधानं कृतम्, तत्तुच्छम्। दोषस्य ध्वंसानन्तत्ववादिनयेऽपि परिहरणीयत्वात्। अद्वैतसिद्धान्तिमते ध्वंसस्यापि कल्पिततया ब्रह्मातिरिक्तत्वरूपप्रयोजकसाम्येन तत्त्वज्ञाननिवर्त्त्यतया निवृत्तिरूपध्वंसाङ्गीकारेऽपि प्रतियोग्युन्मज्जनानङ्गीकारात्। न चेत्यादिकं सर्वमपि शङ्कासमाधानजातं वाङ्मात्रम्। ध्वंसमात्राया ध्वस्तभावविरोधित्वे क्वचित् प्रतियोग्युन्मज्जनं क्वचिन्नेति कल्पनासम्भवात्। पदार्थव्यवस्थाया युष्मत्कल्पनानुरोधित्वासम्भवात्। अन्यथा सर्वत्र वादिप्रतिवादिभिः स्वस्वकल्पनानुरोधेन वस्तुव्यवस्थास्वीकारे आपत्त्यनुपपत्त्यभावेन वादोच्छेदापत्तेः। वायूरूपवानिति केनचित् स्वीकारेऽन्येन चाक्षुषापादने

वायुरूपस्य न चाक्षुषप्रयोजकत्वमिति तेनोक्तौ तस्यापरस्य मूकत्वापातात् शास्त्रोपदिष्टप्रायश्चित्तेनेत्यपि समीचीनं न भवति, तस्य सामान्यतः प्राप्तस्य प्रध्वंसमालायाः प्रध्वस्तविरोधित्वस्य बाधने प्रमाणाभावात्। अनुभूयमानब्राह्मण्यानुपपत्तिस्तु ध्वस्तस्य पुनरुन्मज्जनमनङ्गीकृत्यैव परिहरणीया। किं च न चेत्यादिकमत्यसङ्गतम्, प्रायश्चित्तस्य प्रत्यवायपरीहारफलकस्य सन्ध्यावन्दनत्यागनिमित्तकस्य तत्परिहारनिमित्तकत्वाभावात्। अक्रियात्मकपरिहारनिमित्तत्वाभावाच्च कारणपरोऽयं निमित्तकशब्द इति चेन्न प्रत्यवायपरीहारनिमित्तकः प्रत्यवायः प्रायश्चित्तनिमित्तकं शरीरमित्यपि प्रामाणिकव्यवहारापत्तेः। कृतप्रायश्चित्ते ब्राह्मणे इत्यादिकमसत्। भवन्मतेऽब्राह्मणेनैव प्रायश्चित्तकरणात्। प्रायश्चित्तेन सञ्जातब्राह्मण्य इत्यर्थविवक्षा तु न सम्भवति, प्रायश्चित्तपूर्वोत्तरकालयोस्तस्याधिकारिणोऽवैलक्षण्यदर्शनेन लोकानां तद्दर्शनपूर्वकप्रवृत्त्यसम्भवात्। किं च विहितकालानुष्ठितसन्ध्योपासनस्यापि कस्यचिद्विहितकाले दुर्दिनादौ सन्ध्यावन्दनाऽननुष्ठानभ्रान्त्याकृतप्रायश्चित्तस्य ब्राह्मण्यान्तरोत्पादापत्तिः। एवमनेकब्राह्मण्यापत्तिरेकत्र पूर्वप्रत्यवायनाशोऽपि सहकारिकारणमिति नाशङ्कनीयम्। व्यापारव्यापारिभावमनापन्नस्य तज्जन्यस्य सहकारित्वासम्भवात् अत्रापि द्वारद्वारिभावाङ्गीकारे त्यक्तसन्ध्यावन्दनेन प्रायश्चित्तध्वस्तप्रत्यवायेन पुनः सन्ध्यावन्दनत्यागे विनैव प्रायश्चित्तं ब्राह्मण्योत्पादापत्तेः। यद्देत्यादिकमसमीचीनम्, प्रथमं स्नायन्त इत्यादि-

न्यायावतारः। गङ्गायां घोष इत्यादौ घोषे शैत्यपावनत्वादिधर्माभिव्यक्त्यर्थं लाक्षणिकपदप्रयोगो लोके दृष्टः। प्रकृते न तादृशं किञ्चित् प्रयोजनं दृश्यते। किं च ब्राह्मण्याभिव्यक्तिर्हि तज्ज्ञानम्। तद्विरोधी कश्चन धर्मः सन्ध्यावन्दनत्यागजनितप्रत्यवायेनोत्पाद्यते। तेन च ब्राह्मण्यविरोधिधर्मेण ब्राह्मण्यं नाभिव्यज्यत इति भवतामभिप्रायः। ब्राह्मण्यपदार्थमनुक्त्वा तदभिव्यक्तिपरतया तत्पदव्याख्यानमसङ्गतम्। किं च ब्राह्मण्यं प्रबलस्वविरोधीत्यत्र ब्राह्मण्यपदेन ब्राह्मण्यस्यैव विवक्षणे स्वविरोधीत्यसङ्गतं सन्ध्यावन्दनत्यागजन्यधर्मस्याभिव्यक्तिविरोधित्वस्यैवाङ्गीकारात्। यदि ब्राह्मण्यशब्देन तदभिव्यक्तिरत्रापि विवक्ष्यत इत्युच्यते, तदा आव्रियत इत्यसङ्गतम्। आवरणं हि विषयस्यैव नाभिव्यक्तेः शब्दासाङ्गत्येऽपि ब्राह्मण्याभिव्यक्तिविरोधिधर्मेण ब्राह्मण्यं नाभिव्यज्यत इत्यर्थेनासाङ्गत्यमिति चेन्न तत्राप्यसङ्गतेः। ब्राह्मण्यविरोधिधर्मेण ब्राह्मण्यमाव्रियत इति न सम्भवति, ब्राह्मण्यस्याभिव्यक्त्यभावेऽपि कर्मानुष्ठाननिमित्तब्राह्मण्यस्याक्षतत्वेन प्रायश्चित्तवैयर्थ्यात् कर्मानर्हतारूपनर्वैद्विजकर्मबहिष्कारस्यासिद्धा सन्ध्याहीनः नोपतिष्ठतीत्यादिवचनविरोधश्च। घटादेरन्धकारावृतस्य जलाहरणादिरूपार्थक्रियाकारित्वस्येव ब्राह्मण्यनिष्ठार्थक्रियाकारित्वस्य विरोधाभावेन तस्याकिञ्चित्करत्वात्। किं च सन्ध्यावन्दनत्यागजनितप्रत्यवायेनैव तादृश-ब्राह्मण्यावरणसम्भवे किमन्तर्गड़ुना तादृशधर्मान्तरेण। एतेनेत्यादिकमपि न सम्यक्, अङ्कितत्वस्य भवदुपालम्भहेतुत्वेऽपि

भारते "नारायणाज्जगत्सर्वम्" इत्युक्तमार्कण्डेयादिसहस्रप्रामा-
णिकानां नोपालम्भहेतुत्वम्। किं च भवदभिप्रायस्यैव दुष्टतया
तद्देनमेव हेतुर्वैयर्थ्यस्य यच्चापीत्यादिना यदुक्तम्, तदप्यनुप-
पन्नम्। अस्मदुक्तार्थस्य भवदनुकूलत्वे त्यज्यतामभिप्रायविशेषा-
दरः भवतामित्यादिकमपि दुराग्रहकृतम्त्जीवचर्वणमिति न
तत्खण्डनाय यत्नः कर्तव्य इति।

प्रश्न० सन्ध्यावन्दनाद्यकरणप्रयुक्त पापनाशाय प्रायश्चित्तं
भवत्सम्मतं न वा?

दुर्ज० इति तृतीयं वाक्यम्। पूर्ववाक्ये तु सन्ध्यावन्दना-
भावस्याब्राह्मण्यहेतुत्वमुक्तम्। अत्र तु पापहेतुत्वमुक्तमिति
प्रतिभाति। तच्च किमभिप्रेत्यास्तु किञ्चित् अधिकारिविशे-
षस्य प्रायश्चित्तमसम्मतमेवेति अस्योत्तरम्।

टी० अधिकारिविशेषस्येति सन्न्यासिनो देवयज्ञादिपञ्च-
महायज्ञोपासनाद्यकरणे प्रायश्चित्ताभावादिति भावः।

सज्ज० इति रामानुजीयाः, अथ सन्ध्यावन्दनाद्यकरण-
प्रयुक्तपापविनाशाय प्रायश्चित्तं भवत्सम्मतं न वेत्यवान्तरप्रश्न-
स्याभिप्रायज्ञाने स्वासामर्थ्यमभिधायाधिकारिविशेषस्य प्राय-
श्चित्तमसम्मतमिति स्वरूपाचरविन्यासैकावशिष्टपदार्थ-साका-
ङ्क्षोत्तरमुक्तम्, तन्न शिष्टजनसम्मतम्। तत्राधिकारिविशे-
षस्यासम्मतमित्युक्त्या तादृशप्रायश्चित्तस्य स्वसम्प्रदायिभिरनुष्ठेय-
तयाऽनावश्यकत्वं सूचितम्, तन्नोपपद्यते त्रैवर्णिकानां सन्ध्या-
वन्दनाद्यकरणजन्यप्रत्यवायस्य प्रायश्चित्तमन्तरेण परिहर्तुम-

शक्यत्वात् । न च न वयं त्रैवर्णिकाः, किन्तु विष्णुप्रीतिविशेषविषयत्वरूपविजातीय-धर्माणोऽन्य एव नात आवश्यकतेति वाच्यम्, निरुक्तवैष्णवत्वस्य त्रैवर्णिकत्वबाधकत्ववदाश्रमित्वस्यापि बाधकत्वेऽविशेषात् स्थिते भवतां वर्णाश्रमवहिर्भूतत्वापत्त्या शूद्रादुचित-शङ्खचक्राद्यङ्कनादीनां स्वकल्पितस्मृतिभिस्त्रैवर्णिकेषु प्रसञ्जनप्रयासस्य भवतां वैयर्थ्यापत्तेर्वर्णाश्रमाणामेव श्रुतिस्मृत्यधीनत्वादित्यलमिति तत्खण्डनमिति ।

व्या० अल्पाक्षरविन्यासेनोत्तरदानं शिष्टजनसम्मतमिति शिष्टा एव विदुः, न भवन्तः । किं चास्यार्थस्य प्रथममेव विचारितप्रायत्वात् अल्पाक्षरेण तदभिधानम् । पूर्ववाक्योत्तरेणैव तस्य सम्मतत्वस्य व्युत्पन्नैः सम्यगवधारितत्वात् अधिकारिविशेषस्येत्यनेन त्रैवर्णिकात्रैवर्णिकादि-सन्न्यास्याद्यधिकारिणां परस्परव्यावृत्तनियतधर्मणां विवक्षितत्वस्य स्पष्टं ज्ञातत्वेऽपि तदपहायात्यन्तानभिमतासङ्गनिराकृतार्थ-विशेषपरत्वमारोप्य दूषणाभिधानं सर्वमभिप्रायविशेषज्ञानवतां शिष्टानां न हृदयङ्गमम् । पूर्वोत्तरवाक्ययोर्विरोधमुद्भाव्य तदनादरेणोत्तराभिधानसूचकस्य किमभिप्रेत्येत्यस्याभिप्रायज्ञानसामर्थ्याभावपरत्वोपवर्णनं भवतामेव शोभत इति ।

प्रश्न० गृहस्थानां पञ्चदेवपूजनमावश्यकं न वेति ।

दुर्ज० इति चतुर्थं वाक्यम् । तत्र गृहस्थत्वसामानाधिकरण्येनावश्यकत्वानावश्यकत्वप्रतिपादकं चेदिदं वाक्यं तदाऽस्य विप्रतिपन्नत्वमेव न सम्भवति, एतज्जन्यस्य ज्ञानस्य सामा-

नाधिकरण्येन कोटिद्वयावगाहिनः संशयत्वासम्भवात् संशयजनकवाक्यस्यैव विप्रतिपत्तित्वादतोऽवच्छेदकावच्छेदेनैककोट्यवगाहिनः सामानाधिकरण्येनापरकोट्यवगाहिनो ज्ञानस्य जनकमिदं वक्तव्यम्। एवं च सति विधिकोटिर्निषेधकोटिर्वा भवताऽवच्छेदकावच्छेदेन विवक्षिता नोभयमप्यत्र सम्भवति अनन्यदेवत्वरूपासाधारणाकारभङ्गभीरूणां गृहस्थानां तदावश्यकत्वासम्भवात्, तदन्येषां गृहस्थानां तदानावश्यकत्वासम्भवाच्च। तथा च येऽपरिगृहीतदीक्षाविशेषा मोक्षार्थोपायविशेषानवलम्बिनस्तेषां यथाप्रमाणं पञ्चदेवपूजनमावश्यकं स्यात्। असत्सम्प्रदायिनां तु गृहस्थानामगृहस्थानां चोपायविशेषावलम्बिनाम् परिगृहीतदीक्षाविशेषाणां तदनावश्यकमेवेति।

टी० संशयत्वासम्भवादिति निश्चयान्तर्भावेण परस्परप्रतिबध्यप्रतिबन्धकभावावच्छेदकविषयिताश्रयज्ञानस्यैव संशयत्वात् सामानाधिकरण्येन तत्तदभावावगाहिनिश्चययोः प्रतिबध्यप्रतिबन्धकभावाभावेन तादृशविषयितयोस्तदवच्छेदकत्वासम्भवादिति भावः। अवच्छेदकावच्छेदेनेत्यादि इदमुपलक्षणम् अवच्छेदकावच्छेदेन कोटिद्वयावगाहिज्ञानस्य वा जनकमिदमिति वक्तव्यमित्यपि बोध्यम्। सिद्धोपायनिष्ठानामनन्यदेवत्वं ह्यसाधारणाकारः साक्षाद्देवतान्तरपूजने तदाकारभङ्गः स्यादिति भावः। उपायविशेषावलम्बिनामिति सिद्धोपायावलम्बिनामित्यर्थः।

सज्ज० इति रामानुजीयाः, गृहस्थानां पञ्चदेवतापूजन-

मावश्यकं न वेति प्रश्नस्य यथावदभिप्रायमज्ञात्वा स्वसम्प्रदायिनां मुपायविशेषावलम्बिनामनावश्यकं तदन्येषामावश्यकमित्युत्तर-मुक्तम्, तत्र प्रत्युच्यते। न हि गृहस्थत्वसामानाधिकरण्येन तदावश्यकत्वानावश्यकत्वे चास्माभिरुद्भाविते न वावच्छेदकावच्छे-देन तदन्यतरत्, किन्त्ववच्छेदकावच्छेदेनोभयमप्यनिश्चितम्। अनिश्चयकारणं तु,—

"गृहस्थैर्देवतानां च पञ्चानां पूजनं पृथक्।
शिवविष्णुगणेशार्कशक्तीनां कार्य्यमादरात्॥"

तथा,—

"देवान् पञ्च समभ्यर्च्य गृहस्थाः शुभमाप्नुयुः।"

इत्याद्यनेकव्यासाद्युक्तवाक्यैर्बाऽसति बाधके प्रमाणानां सामान्ये पक्षपातात् गृहस्थेष्ववच्छेदकावच्छेदेन तदावश्यकत्वेऽवगते सति भवत्सम्प्रदायिषु तस्यादर्शनेन गृहस्थकर्तृक-पूजनत्वतदभावसह-चरितावश्यकत्वप्रकारकं निरुक्तपूजनधर्मिकं ज्ञानमेव तथाविध-ज्ञानजनित-निरुक्तानिर्णयस्यावश्यकत्वानावश्यकत्वकोट्यवगाहि-तया निरुक्तवचनसङ्कोचे प्रमाणाभावेनावच्छेदकावच्छेदेन पूज-नावश्यकत्वस्य वक्तव्यतया भवत्सम्प्रदायिनां गृहस्थत्वधर्माक्रान्तानां पञ्चदेवतापूजनोल्लङ्घनप्रयुक्तप्रत्यवायित्वापत्तिः कथमुद्धारणीया? न चास्मद्व्यवहारानुरोधेनोक्तवचनं गृहस्थत्वसामानाधिकरण्येन पूजनावश्यकत्वबोधकमतो नास्माकं दोष इति वाच्यम्, भवादृश-व्यवहारानुरोधित्वे शास्त्रस्य सर्वकर्मकाण्डस्य विप्लवापत्तेः अन्त-रेण वास्तवश्रुतिप्रमाणं वादरायणोक्तवचनसङ्कोचस्य अशक्यत्वापि

कर्तुमशक्यत्वात् इत्यस्मत्प्रश्नोत्तरं मनः प्रणिधाय देयमित्युक्तमिति तत्खण्डनमिति ।

व्या० अभिप्रायमज्ञात्वेति भवतां गायत्रीजपः न तत्र किञ्चिदस्माभिर्वक्तव्यम् । यच्च उत्तराभिधानेऽपि भवद्भिस्तत्यागाकरणात् अनिश्चयकारणमित्यादिनिरुक्तपूजन-धर्मिकज्ञानमेवेत्युक्तम् अनाघ्रातशास्त्र-तदर्थगन्धानां वाक्यम् । अनिश्चयो हि निश्चयाभावः नित्यस्तु तस्य कारणमेव न सम्भवति, किन्तु नियामकं भवति । तच्चापरकोटिग्राहकसामग्र्यभावविशिष्टैककोटिविशिष्टज्ञानजनकसामग्रीविरह एव । भवदुक्तज्ञानं तु सर्वथा न प्रयोजकम् । किं च गृहस्थैर्देवतानां चेत्यादिवचनं च पञ्चदेवपूजनस्यावश्यकत्वं यावज्जीवमग्निहोत्रं जुहोतीत्यादिवाक्यमग्निहोत्रस्य ब्राह्मणावश्यकत्वमिव न पूर्वगृहस्थानामभिदधाति,—

"देवान् पञ्च समभ्यर्च्य गृहस्थाः शुभमाप्नुयुः ।"

इति वाक्येन तस्य काम्यत्वावगमात्, न चार्थवादिकफलेन काम्यत्वं न सम्भवति अन्यथा,—

"सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥"

इत्यर्थवादेन काम्यत्वावगतौ सन्ध्यावन्दनस्यापि नित्यत्वं न स्यादिति वाच्यम्, रात्रीरूपेयादित्युक्तस्य यागविशेषस्य "प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ति" इत्याद्यर्थवादीयफलस्याङ्गीकृतत्वादभियुक्तैः न तावता सन्ध्यावन्दनादेर्नित्यत्वहानिः

तस्य सर्वोपायानुष्ठानयोग्यतापादकस्य तदनुष्ठानद्वारा फल-विशेषसम्बन्धेऽपि तदनपायात् । न हि पञ्चदेवतापूजनस्य सर्वोपायानुष्ठानयोग्यता-सम्पादकत्वं सन्न्यासिनां तदभावेऽपि तदनपायात् । एवं नित्यस्याप्यग्निहोत्रस्य सन्न्यासिना त्यागेऽपि प्रत्यवायाभाववत् अधिकारिविशेषेण तदकरणेऽपि प्रत्यवायाभावात् । एतेन वक्ष्यमाणा प्रत्यवायापत्तिर्निराकृता वेदितव्या असति बाधके प्रमाणानां सामान्यपर्य्यवसानेऽपि अत्रासाधारणाकारभङ्गस्यैव बाधकत्वेन तदाकारबोधकवाक्यानामेव बाधकत्वात् । एवं,—

"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।

तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम् ॥"

इति वचनमेव देवतान्तरपूजनस्याविधिपूर्वकत्वाभिधायकं बाधकप्रायमेवातोऽस्य वाक्यस्य न सामान्यपर्य्यवसानं युक्तम् । अतएव गृहस्थानामवच्छेदकावच्छेदेन न तदावश्यकत्वावगतिः । अतएवास्मत्सम्प्रदायिषु तददर्शनम् । किं चात्र संशयकारण-समानधर्मज्ञानं सम्यगुपलब्धं भवद्भिः गृहस्थकर्तृकपूजनत्वतदभाव-सहचरितावश्यकत्वप्रकारकं पूजनधर्मिकं ज्ञानं हि स्वधर्मिणि कोटिद्वयोपस्थितिद्वारा गृहस्थकर्तृकपूजनत्वतदभावसंशयं जनयेत्, न तु गृहस्थत्वावच्छेदेनावश्यकत्वानावश्यकत्वयोः अतस्तथाप्येतज्ज्ञानजनितेत्यादिकं भवतां मौढ्यमेव प्रकटीकरोति । किं चानिर्णयस्य निर्णयाभावस्य कोट्यवगाहित्वमपि न सम्भवति, एतेन अनिश्चितमित्यस्य संशयितमित्यर्थः । अनिश्चय-कारणमित्यस्य निश्चयविरोधिसंशयकारणमित्यर्थः । अत्र निश्चय-

विरोधित्वं न तत्प्रतिबन्धकत्वम्, किं तु तदधिकरणे तत्कालावच्छेदेनानुत्पद्यमानत्वं निरुक्तानिर्णयस्येत्यस्य निरुक्तसंशयस्येत्यर्थ इत्युक्तावपि न निस्तारः निरुक्तवचनेत्यादिकमपि तुच्छम्। सङ्कोचप्रमाणस्योक्तत्वात् अवच्छेदकावच्छेदेन तादृशपूजनावश्यकत्वस्य वक्तुमशक्यत्वात्, पूजनस्य नित्यत्वाभावोक्त्या प्रत्यवायित्वस्य दूरापास्तत्वाच्च कथमुद्धरणीयेति वन्ध्यासुतस्य परिवित्तिदोषवदुद्धरणीयेति सदुत्तरमवगन्तव्यम्, न चेत्यादिकमपि कवलमारोपमात्रम्। न हि केनापि स्वानुष्ठानानुरोधेन वचनव्यवस्था कर्तुं शक्यते, प्रामाणिकाचारस्य प्रमाणाधीनव्यवस्थत्वात् अन्तरेण वास्तवश्रुतिप्रमाणमित्यपि न सम्यक् श्रुतिप्रमाणस्यावास्तवत्वाभावेन विशेषणस्याव्यावर्तकत्वात् स्मृतिप्रमाणस्य स्मृतिप्रमाणेनापि सङ्कोचसम्भवात्। यदीदमुत्तरं विना प्रणिधानं मनस उक्तमिति जानन्ति भवन्तस्तर्हि प्रणिधाने कीदृशमुत्तरं भवेदिति प्रतिपद्यतामिति।

प्रश्न० पार्थिवपूजनमन्तरा गृहस्थानां भोजनमुचितं न वेति?

दुर्ज० इति पञ्चमं वाक्यम्, तत्रोत्तरम्। शैवानां गृहस्थानामवश्यकर्तव्य-पार्थिवपूजनतया शास्त्रप्रतिपाद्यानां पार्थिवपूजामन्तरा भोजनमनुचितम्। अस्मादृशां सम्प्रदायविशेषवतामुचितमेवेति।

टी० अवश्यकर्तव्येत्यादि अवश्यकर्तव्यं पार्थिवपूजनं येषां तादृशतयेत्यर्थः।

सज्ज० इति रामानुजीयाः, पार्थिवपूजनमन्तरा गृहस्थानां भोजनमुचितं न वेति प्रश्नस्य शैवानामनुचितं सम्प्रदायविशेषवतामुचितमित्युत्तरमुक्तम्। तत्र प्रत्युच्यते,—

"निर्माय पार्थिवं लिङ्गं समभ्यर्च्य यथाविधि।
भुञ्जीतेति गृहस्थानां धर्मः श्रेयान् सनातनः॥"

इत्यादिलिङ्गपुराणादिदृष्टव्यासाद्युक्तानेकवाक्यानां सम्प्रदायविशेषादतिरिक्त-विषयकत्वकल्पक-वाक्यान्तरालाभात् भवतां दुराग्रह एवायमिति तत्खण्डनमिति।

व्या० निर्मायेत्यादिवाक्यानां शैवाधिकारिपरत्वेन सङ्कोचकप्रमाणं यदि नोपलभ्यते, तदा भवदुक्तं युक्तमपि भवेत्, तत्सङ्कोचकानां बहूनां प्रमाणानामुपलम्भात् न भवदुक्तं युक्तम्। तानि च पाद्मे भृगुवचनम्,—

"शुद्धसत्त्वमयो विष्णुः कल्याणगुणसागरः।
नारायणः परं ब्रह्म विप्राणां दैवतं हरिः॥
स एव पूज्यो विप्राणां नेतरः पुरुषर्षभ!।
नान्यं देवं निरीक्षेत नान्यं देवं प्रपूजयेत्॥
न चान्यं प्रणमेद् विप्रः ——————"

इत्यादीनि।

प्रश्न० बलिवैश्वदेवादिकं कर्तव्यं न वेति?

दुर्ज० इति षष्ठं वाक्यम्, तत्रोत्तरम्। तदधिकारिणां कर्तव्यमेवेति।

टी० सन्न्यासिप्रभृतीनां तदधिकाराभावादिति भावः।

प्रश्न० इति रामानुजीयाः, बलिवैश्वदेवादिकं कर्त्तव्यं न वेति प्रश्नस्य तदधिकारिणां कर्त्तव्यमिति उत्तरेण भयप्रद-दायिनां तदनधिकार इति तात्पर्य्यगत्या प्रतीतं तत्याकवक्षे षति नोचितमिति प्रतिभातीति तत्खण्डनमिति।

व्या० सन्ध्यास्नाद्यधिकारिविशेषापेक्षया तदधिकारिणा-मित्यस्मदुक्तस्यान्यथैवाभिप्रायं प्रकल्प्य दूषणाभिधानं छलरूप-निग्रहस्थानमिति न भवतां तदुचितमिति प्रतिभातीति।

प्रश्न० भगवन्निवेदितवस्तूनां ग्रहणे विधिनिषेधयोः का गतिः?

इजे० इति सप्तमं वाक्यम्। अत्र यद्यपि विधिनिषेध-वाक्यानि भवता न लिखितानि, तथापि अस्माभिरेव तानि विलिख्य गतिरुच्यते, सनत्कुमारसंहितायां,—

"निवेदितं तु यद्द्रव्यं पुष्पं फलमथापि वा।
निर्माल्यमिति तत्प्रोक्तम् तत्प्रयत्नेन वर्जयेत्॥"

तथा तत्रैव

"निर्माल्यं भक्षयित्वैवमुच्छिष्टमणुरोरपि।
मासं पयोव्रती भूत्वा जपन्नष्टाक्षरं सदा॥
ब्रह्मकूर्चं ततः पीत्वा पूतो भवति मानवः।"

इति तथेन्द्ररात्रे,—

"न चोपजीवेद् देवेशं न निर्माल्यानि भक्षयेत्।"

तथान्यत्र,—

"न चोपयोगयोग्यानि निर्माल्यानि कदाचन।"

इति तथा संहितान्तरे,—